THE

PRINCESS OF WALES

SARASWATĪ BHAVANA TEXTS

*No. 51*

—o—

EDITED BY

GOPĪ NĀTHA KAVIRĀJA, M. A.

THE

# ADVAITA SIDDHĀNTA VIDYOTANA

*Printed by Jai Krishna Das Gupta*

*Vidya Vilas Press, Benares City.*

1934

श्रीगौडब्रह्मानन्दसरस्वतीविरचितं

# अद्वैतसिद्धान्तविद्योतनम् ।

वाराणसेयराजकीयसंस्कृतमहाविद्यालयन्यायशास्त्राध्यापकेन

न्यायव्याकरणाचार्यसूर्यनारायणशर्मशुक्लेन

टिप्पण्या समलङ्कृत्य संशोधितम् ।

---

THE

# ADVAITASIDDHĀNTA VIDYOTANA

OF

S'RĪ GAUḌA BRAHMĀNANDA SARASVATĪ

---

*Edited with notes etc.*

By

NYĀYA VYĀKARAṆĀCHĀRYA

PANDIT SŪRYA NĀRĀYAṆA S'UKLA,

Professor, Government Sanskrit College,

BENARES.

---

1934.

# भूमिका।

सुविदितमेवेदं तत्र भवतामद्वैतसिद्धान्तरसिकानां यद् अख्याति-रात्मख्यातिरसत्ख्यातिः सदसत्ख्यातिः सत्ख्यातिरन्यथाख्यातिरनिर्व-चनीयख्यातिरिति वादिनां मतिवैलक्षण्येन सप्तविधास्वपि ख्यातिषु अनिर्वचनीयख्यातिरेवाद्वैतब्रह्मविदां परमः सिद्धान्त इति। स चायम-निर्वचनीयख्यातिवादः शाङ्करभाष्यभामतीखण्डनखाद्याद्वैतसिद्धिलघु-चन्द्रिकादिनिबन्धेषु बहुषु स्थलेषु निरूपितोऽपि साकल्येन नैयायिकमत-दूषणपुरस्सरं नैकत्र निरूपित इत्यनुसन्धाय अद्वैतसिद्धान्तविद्योतनं नाम ग्रन्थरत्नं गौडब्रह्मानन्दसरस्वतीस्वामिनो न्यभान्त्सुः।

इमे च गौडब्रह्मानन्दसरस्वतीस्वामिनः श्रीपरमानन्दसर-स्वतीस्वामिनां दीक्षाशिष्याः श्रीनारायणतीर्थस्वामिनां विद्या-शिष्याश्चासन् इति "भजे श्रीपरमानन्दसरस्वत्यङ्घ्रिपङ्कजम्। यत्कृ-पाद्रष्टिलेशेन तीर्णः संसारसागरः॥ श्रीनारायणतीर्थानां षट्शास्त्री-पारमीयुषाम्। चरणौ शरणीकृत्य तीर्णः सारस्वतार्णवः॥" इति लघुचन्द्रिकास्थपद्याभ्यामवगम्यते। नारायणतीर्थाश्च १७९० ई० वर्षासन्नसमये आसन्निति एषामपि स एव समय इत्यैतिहासिकानां प्रवादः।

यद्यपि अद्वैतसिद्धान्तविद्योतने स्वकृतस्यान्यस्य ग्रन्थस्य नाम्नो-ऽनिर्देशात् अद्वैतसिद्धिव्याख्यातुर्गौडब्रह्मानन्दसरस्वतीस्वामिन ए-वेयं कृतिरिति संदिग्धमिव प्रतिभाति तथापि गुरुचन्द्रिकाया प्रारम्भे 'सदनन्तचिदानन्दे जगती यत्र जायते। रजताद्रीव शुक्त्यादौ तदे-वाहं परा गतिः' इति पद्यस्य अद्वैतसिद्धान्तविद्योतनस्थस्य दर्शनेनो-भयोरेक एव कर्तेति निश्चेतुमलम्। अद्वैतसिद्धान्तविद्योतनेऽन्येषां स्वकृतनिबन्धानां नाम्नोऽनिर्देशस्तु सर्वप्रथममस्यैव निर्माणमिति कल्पनयापि समाहितुं शक्यः।

एतत्प्रणीता निबन्धाश्च सिद्धान्तबिन्दुव्याख्या न्यायरत्नावली (१) मीमांसाचन्द्रिका (२) अद्वैतसिद्धिव्याख्ये—लघुचन्द्रिका (३) गुरु-

चन्द्रिकाख्ये (४) अद्वैतसिद्धान्तविद्योतनं(५) वेदान्तसूत्रमुक्तावली(६) चेति षडेव श्रूयन्ते मुद्रिता उपलभ्यन्ते च ।

यद्यपि 'महानुभावधौरेयशिवरामाख्यवर्णिनः । एतद्ग्रन्थस्य कर्तारो लेखकाः केवलं वयम् ॥' इति लघुचन्द्रिकासमाप्तिस्थपद्यदर्शनेन लघुचन्द्रिका शिवरामवर्णिकृतेति प्रतीयते तथापि शिवरामाख्यः कश्चन ब्रह्मचारी गौडब्रह्मानन्दसरस्वतीस्वामिनां शिष्यः सतीर्थ्यो वा भवेत् यत्प्रेरणया यत्कृतभोजनादिसाहाय्येन वा लघुचन्द्रिका कृतेयेतन्मात्रेण शिवरामाख्यवर्णिनि लघुचन्द्रिकाकर्तृत्वव्यपदेशस्य संभवात् अन्यथा लेखके कर्तृत्वव्यवहारस्य कुत्राप्यदर्शनेन गौडब्रह्मानन्दकृतिः लघुचन्द्रिकेति व्यवहारस्योपरोधः स्यात् ।

न च शिवरामाख्यवर्णी अस्य गुरुरेव किं न स्यादिति वाच्यम् श्रीनारायणतीर्थश्रीपरमानन्दपादयोः । ब्रह्मानन्दयतिर्नत्वा तनोत्यद्वैतचन्द्रिकाम् ॥ इत्यादिपद्यैर्गुरुचन्द्रिकादौ नारायणतीर्थपरमानन्दसरस्वत्योर्नमस्कारादिवत् कुत्रापि शिवरामख्यवर्णिनो नमस्कारस्यादर्शनेन गुरुत्वकल्पनाया अनौचित्यात् महानुभावधौरेयेति विशेषणस्य दातरि एव प्रायशो दर्शनेन शिवरामाख्यवर्णी लघुचन्द्रिकानिर्माणसमये अन्नादिसाहाय्यदातैवेति निश्चयः ।

अमु ग्रन्थं प्राच्यप्रतीच्योभयदर्शननिष्णातवाराणसेयराजकीयसंस्कृतपाठशालाध्यक्षपण्डितप्रवरश्रीगोपीनाथकविराज एम, ए, महोदयानामादेशेन सरस्वतीभवनपुस्तकालयात्संगृह्य अशुद्धिबहुलेनापि स्वकीयपुस्तकेन स्थलविशेषे साहाय्यमवाप्य स्वरचितया टिप्पण्या सह संपादितवानस्मि पुस्तकद्वयमपि प्रथमपरिच्छेदमात्रं पुस्तकान्तरं तु ततोऽधिकं न लभ्यत इति तावदेव संपाद्य चन्द्रखण्डं चन्द्रचूड इव खण्डितमपीदं पुस्तकमद्वैतसिद्धान्तरसिका भवन्तः शिरसा श्लाघिष्यन्ते इति तावदेवोपहारीकरोमि—

राजकीयसंस्कृत महाविद्यालयः
१९९१'व० सं० अधिक-
वैशाखपूर्णिमा

संस्कृतप्रणयिनामनुचरः
सूर्यनारायणशर्मशुक्लः

# अद्वैतसिद्धान्तविद्योतनस्थविषयाणां
# सूचीपत्रम् ।


| | पृष्ठम् |
|---|---|
| ज्ञानलक्षणाखण्डनम् | १ |
| दोषस्य प्रत्यक्षहेतुताखण्डनम् | ३ |
| अनिर्वचनीयरजतस्य दोषकार्यत्वे गौरवपरिहारः | १७ |
| अनिर्वचनीयरजतस्य यौक्तिकत्वम् | २० |
| अनिर्वचनीयरजतस्य श्रौतत्वनिरूपणम् | २५ |
| अनिर्वचनीयरजतकल्पने गौरवपरिहरणम् | २६ |
| भ्रमस्थले रजतोत्पत्त्यनन्तरं रजतोत्पत्तिवारणम् | २८ |
| आत्मनोऽनुभवरूपत्वे श्रुतिसंग्रहः | ३१ |
| आत्मनोऽनुभवरूपत्वे युक्तिसंग्रहः | ३२ |
| वृत्तिं विना 'शुक्तिं साक्षात्करोमि' इति प्रतीतिवारणम् | ३४ |
| वृत्तेरुपयोगनिरूपणम् | ३५ |
| अभिभवस्वरूपनिरूपणम् | ३८ |
| एकाज्ञानपक्षे एकाज्ञाननिवृत्तौ मोक्षापत्तिनिरासः | ३६ |
| अपरोक्षतानिष्कृष्टलक्षणम् | ४२ |
| अस्तित्वस्य चैतन्यरूपत्वम् | ४४ |
| अस्तित्वस्य सत्ताजातिरूपत्वखण्डनम् | ४५ |
| परोक्षवृत्तेर्विषयानवच्छेद्यत्वम् | ४८ |
| प्रत्यक्षवृत्तेर्विषयावच्छेद्यत्वम् | ४६ |
| वृत्तिषु ज्ञानत्वस्य सविषयकत्वस्य चाभावः | ५१ |
| अज्ञानस्य भावरूपत्वसमर्थनम् | ५४ |
| भ्रमे बाधाभावतत्सामग्र्यभावयोः कारणत्वे गौरवम् | ६१ |

| | पृष्ठम् |
|---|---|
| भावरूपाज्ञानस्याङ्गीकारे लाघवम् | ६३ |
| अभावरूपाज्ञानपक्षे लाघवशङ्का | ६४ |
| अभावरूपाज्ञानपक्षे महागौरवोद्भावनम् | ६५ |
| रजतस्याज्ञानकार्यत्वे लाघवम् | ६७ |
| रजतस्मरणानुपपत्तिशङ्का | ७५ |
| रजतस्मरणोपपादनम् | ७७ |
| प्रमाभ्रमयोः स्वतस्त्वपरतस्त्वे | ८० |
| विशिष्टस्मृतीच्छादेर्विशिष्टज्ञानाभावप्रयोज्यत्वम् | ८३ |
| सर्वं साक्षिभास्यमित्यस्योपपादनम् | ८३ |
| शुद्धचित औपनिषदत्वम् | ८६ |
| तत्त्वज्ञानार्थं प्रवृत्त्यनुपपत्तिशङ्का | ८९ |
| तत्त्वज्ञानार्थं प्रवृत्त्यनुपपत्तिवारणम् | ८९ |
| अविद्याध्वंसस्यात्मरूपत्वकथनम् | ९२ |

श्रीविश्वेश्वरः शरणम् ।

श्रीब्रह्मानन्दसरस्वतीविरचितम्

# अद्वैतसिद्धान्तविद्योतनम् ।

सदनन्तचिदानन्दे जगती यत्र जायते ।
रजतादीव शुक्त्यादौ तदेवाहं परा गतिः ॥ १ ॥

ननु देशान्तरीयरजतादेरेव भानेनोपपत्तौ 'इदं रजतम्' इत्यादिभ्रमस्थले शुक्त्यादौ रजताद्युत्पत्तिकल्पने गौरवमिति चेन्न—रजतादौ चक्षुरादेः सन्निकर्षं विना चाक्षुषाद्यनुपपत्तेः ।

## ज्ञानलक्षणाखण्डनम् ।

न च लौकिकविषयतासम्बन्धेनैव चाक्षुषादिकं प्रति चक्षुरादिसंप्रयोगस्य हेतुत्वादलौकिकचाक्षुषादिकमलौकिकज्ञानलक्षणादिसम्प्रयोगेणैव(१) भविष्यतीति वाच्यम्, सुरभिचन्दनमित्यादौ 'सौरभं

---

विश्वेश्वरं समाराध्य तातं रामेश्वरं तथा ।
टिप्पण्यद्वैतसिद्धान्तविद्योते क्रियते मया ॥

(१) ज्ञानलक्षणासंनिकर्षेणैवेत्यर्थः । ज्ञानलक्षणासंनिकर्षश्च स्वसंयुक्तमनःसंयुक्तात्मसमवेतस्मृतिविषयत्वरूपः । स्वं चक्षुरिन्द्रियं तत्संयुक्त आत्मा तत्समवेता स्मृतिः–चाकचिक्यदर्शनोद्बुद्धसंस्कारजन्या रजतस्मृतिः तद्विषयत्वं रजतादेरिति रजतादिना चक्षुषः संयोगसन्निकर्षस्यासत्त्वेऽपि ज्ञानलक्षणाख्योऽलौकिकः सन्निकर्षोऽस्त्येवेति भावः ।

पश्यामि' इत्यादिप्रत्ययाभावेन विषयतासम्बन्धेन चाक्षुषत्वाद्यवच्छिन्नाधिकरणताया सौरभादौ सत्त्वे मानाभावेन लौकिकान्यविषयतासम्बन्धेन चाक्षुषाद्युत्पत्तये ज्ञानलक्षणादेः सन्निकर्षत्वस्य कल्पयितुमशक्यत्वात् 'सौरभं स्मरामि' इत्यादिप्रत्ययाभ्युपगमेन विषयतासम्बन्धेन स्मृतित्वावच्छिन्नाधिकरणताया एव तत्र स्वीकारात्, युगपज्ज्ञानद्वये (१) मानाभावेऽप्येकस्मिन्नेव ज्ञाने चाक्षुषत्वस्मृतित्वादिसत्त्वे बाधकाभावात्, (२) साङ्कर्यांशिकत्वयोः (३) प्रामाणिकयोर्दोषत्वस्याप्रामाणिकत्वात्, जातेः संस्थानव्यङ्ग्यत्वमते गुणाद्यवृत्तित्वेपि चाक्षुषत्वादेर्विषयताविशेषरूपत्वस्य संभवाच्च, लौकिकत्वाऽलौकिकत्वविशेषाभावेन विषयतासम्बन्धेन चाक्षुषमात्रे लाघवात्सम्प्रयोगहेतुत्वाङ्गीकारात्, इदं रजतं पश्यामीत्याद्यनुभवेन भ्रमस्थले लौकिकवि-

---

( १ ) ज्ञानद्वय इति । 'सुरभि चन्दनम्' इत्यत्र सरभीति स्मरणं चन्दनमिति प्रत्यक्षम् इति ज्ञानद्वयं स्थातुं नार्हति योग्यविभुविशेषगुणानां यौगपद्यनिषेधादिति भावः ।

( २ ) साङ्कर्यं परस्परात्यन्ताभावसमानाधिकरणधर्मयोरेकत्र समावेशः, घट इति चाक्षुषे स्मृतित्वाभावः घटस्मृतौ चाक्षुषत्वाभावः सुरभि चन्दनमित्यत्र च उभयोः समावेशः इति साङ्कर्येण चाक्षुषत्वं जातिर्न स्यात् ।

( ३ ) आंशिकत्वमव्याप्यवृत्तित्वम्, सुरभि चन्दनम् इत्येकस्मिन्नेव ज्ञाने चन्दनविषयावच्छेदेन चाक्षुषत्वम् सौरभविषयावच्छेदेन चाक्षुषत्वाभावः स्यात्तच्चायुक्तम् जातौ स्वाभावसामानाधिकरण्यस्य विरुद्धत्वादिति भावः ।

षयत्वावश्यकत्वाच्च, अन्यथा रजतादौ लौकिकप्रत्यक्षं विना रजताद्यानयनादौ प्रवृत्त्यनुपपत्तेः ।

## दोषस्य प्रत्यक्षहेतुताखण्डनम् ।

अथ सम्प्रयोगस्येव दोषस्याप्यन्वयव्यतिरेकाभ्यां प्रत्यक्षहेतुत्वमिति चेन्न—शुक्त्यादौ रजताद्युत्पत्तौ स्वीक्रियमाणायामावश्यकसम्प्रयोगहेतुत्वेनैवोपपत्तेः, प्रथमक्षणे चाक्षुषाद्यसम्भवेऽपि(१) मन्मते साक्षिभास्यत्वेनैव प्रातिभासिकत्वोपपत्तेः, द्वितीयक्षणे सम्प्रयोगसम्पत्त्या तृतीयक्षणे नित्यसिद्धसाक्षिणश्चाक्षुषादिवृत्तिविषयकस्य 'रजतं पश्यामि' इत्याद्याकारकस्य सम्भवात्(२), त्वन्मतेऽपि विशिष्टवैशिष्ट्यगोचरजन्यप्रत्यक्षस्य विशेषणतावच्छेदकप्रकारकज्ञानादिजन्यत्वेनानुव्यवसायस्य च व्यवसायरूपविषयजन्यत्वेन तृतीय-

(१) प्रथमेति । उत्पन्नं द्रव्यं क्षणमगुणं निष्क्रियं च तिष्ठतीति नियमेन प्रथमक्षणे सम्प्रयोगासम्भवादिति भावः । ननु तदानीं रजतस्य प्रतिभासो न स्यादत आह साक्षिभास्यत्वेनेति अयं भावः । अन्तः करणोपहितं चैतन्यं साक्षि, विषयचैतन्यनिष्ठा शुक्तित्वप्रकारिकाऽविद्या चाकचिक्यदर्शनोद्बुद्धरजतसंस्कारसहिता काचादिदोषसमवहिता रजतरूपार्थाकारेण रजतज्ञानाभासाकारेण च परिणमते । साक्ष्यभिन्नविषयचैतन्याध्यस्तं रजतं साक्षिण्यध्यस्तं केवलसाक्षिवेद्यमित्युच्यते इति ।

(२) सम्भवादिति । न च रजतज्ञानस्याचाक्षुषत्वे 'रजतं पश्यामि' इति अनुभवः कथम्, चाक्षुषेदंवृत्त्यवच्छिन्नचैतन्यस्याविद्यापरिणामत्वेन चाक्षुषत्वोपचारात् ।

त्वाद्यादावेव तादृशानुभवस्य सम्भवात्, किञ्च विषयदोषस्य(१) कारणत्वस्थले तत्कार्यता रजतादिलौकिकप्रकारतानिरूपितसंसर्गतानिरूपितविशेष्यतासम्बन्धेन चाक्षुषत्वादिना वाच्या, तथा च लाघवात्तादात्म्यादिसम्बन्धेन रजतत्वादिनैव सोच्यताम्, इन्द्रियनिष्ठस्य काचादिदोषस्यापि शङ्खादिविषयविशेष एव पीतत्वादिभ्रमविशेषजननात्तादृश(२)विषयविशेषनिष्ठेन स्वाश्रयसंयोगादिना हेतुत्वे तत्कार्यतापि समवायादिना पीतत्वादिनैवोच्यताम्, एवमात्मनिष्ठस्य रागादिदोषस्य हेतुत्वस्थलेपि रजतत्वादिनैव ।

न च तत्र रजतादेरात्मप्रत्यासत्त्यसम्भवः शङ्कनीयः, शरीराद्यवच्छेदेन ज्ञानादेरिव शुक्तीदन्त्वादिविशिष्टावच्छेदेन रजतादेरात्मसमवाये बाधकाभावात् तत्प्रत्यासत्त्यैव कार्यत्वसम्भवात्, अत एव भ्रमस्थले रजताद्युत्पत्त्यङ्गीकारे दोषरहितस्यापि तत्प्रत्यक्षमस्त्विति

---

(१) विषयदोषस्येति । इदं रजतमित्यत्र तादात्म्येन रजतमिदमि प्रकारीभूतमिति रजतप्रकारतानिरूपिततादात्म्यसंसर्गनिष्ठसंसर्गतानिरूपितविशेष्यतासम्बन्धेन (तादात्म्यसम्बन्धावच्छिन्नरजतत्वावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेन) चाक्षुषं प्रति समवायेन चाकचिक्यादिविषयदोषः कारणमिति वाच्यम् तदपेक्षया तादात्म्येन रजतं प्रति समवायेन विषयदोषस्य कारणतास्वीकारे लाघवमिति भावः ।

(२) तादृशविषयविशेषनिष्ठेति । समवायेन पीतं प्रति शङ्खनिष्ठस्वाश्रयसंयोगसम्बन्धेन काचादिरिन्द्रियदोषः कारणम् । स्वं दोषः तदाश्रय इन्द्रियं तत्संयोगः शङ्खे इति तत्र समवायेन पीतरूपोत्पत्तिरिति भावः ।

परास्तम्—तत्पुरुषसमवेतविषयप्रत्यक्षे तादात्म्येन तत्पुरुषत्वेन हेतुत्वात् ।

न च मनसा रजतादिकं साक्षात्करोमीत्यनुभवापत्तिरिति वाच्यम्, मनःसन्निकर्षस्य विलम्बेन सुखादिसाक्षात्कारस्य विलम्बादर्शनेन तस्य तत्र(१) हेतुत्वाकल्पनात् । साक्षात्कारत्वस्यैव जन्यसाक्षात्कारत्वस्यापि इन्द्रियसन्निकर्षजन्यत्वव्याप्यत्वे मानाभावात् ॥

ननु तथाप्यहं सुखीतिवदहं रजतवानित्यादिप्रत्ययः प्रमा(२) स्यादिति चेन्न—'अहमिहैवास्मि'इति प्रत्ययस्य विशेष्यतावच्छेदकीभूततत्तच्छरीरावच्छेदेनैतद्देशमात्रसंयोगित्वाद्यवगाहित्ववदुक्तप्रत्ययस्यापि तदवच्छेदेन रजताद्यवगाहित्वेन भ्रमत्वात्, परमतेपि शरीराभिन्नत्वेनैवात्मनोऽहङ्कारप्रत्ययविषयत्वात्, तदुक्तं टीकायां मिश्रैः—'येऽप्यहंकारास्पदमात्मानमास्थिषत तैरप्यहमाकारप्रत्ययस्यातात्त्विकत्वमभ्युपेयम् 'अहमिवास्मि हैसदने जानान' इत्यादौ सर्वगतस्याप्यात्मनः प्रादेशिकत्वानुभवाद्' इति । देशविशेषमात्रसंयोगित्वरूपप्रादेशिकत्वस्य शरीराभेदावच्छेदेनात्मनि सत्त्वेपि तत्र शरीराभेदस्य विरहेणोक्तप्रत्ययस्याप्रमात्वरूपमतात्त्विकत्वमित्यर्थः ।

न च रागादिदोषप्रत्यक्षयोर्विषयतयैव लाघवेन हेतुहेतुमद्भावाङ्गीकारात्तत्र विषयानिवेशात्कथं तत्र भ्रमविषयोत्पत्तिरिति वाच्यम्—

---

(१) हेतुत्वाकल्पनादिति । मिथ्यारजतस्य साक्षात्साक्षिसम्बन्धितया सम्बन्धार्थाया आवरणाभिभवार्थाया वा वृत्तेरनावश्यकत्वादिति भावः ।

(२) प्रमेति । रागजन्यस्य रजतस्य शुक्तीदन्त्वविशिष्टावच्छेदेनात्मनि समवायेन सत्त्वादिति शेषः ।

येन प्रकारेण रागस्तेनैव प्रकारेण तस्य प्रत्यक्षभ्रमहेतुत्वेन विषयतावच्छेदकत्वसम्बन्धेनैव(१) हेतुहेतुमद्भावस्य वाच्यतया(२) तदवच्छेदकयोस्तत्पुरुषीयत्वस्यावश्यनिवेश्यतया (३)तदपेक्षया रजतादिरागत्वेन रजतत्वादिना समवायेन तदुक्तेर्युक्तत्वात्, अन्यथा कार्यतावच्छेदकसम्बन्धे विषयतानिरूपितत्वावच्छेदकतात्वयोर्विशेष्यविशेषणभावे विनिगमकविरहेण हेतुताद्वयस्य सम्बन्धतावच्छेदकगौरवस्य चापत्तेः, सकलविषयेषु रागानुदयेन पुरुषापेक्षयाधिक्येपि विषयनिवेशकृतगौरवाभावात् ।

---

(१) तत्पुरुषीयः येन प्रकारेण प्रत्यक्षभ्रमः तत्पुरुषीयस्तेन प्रकारेण रागः कारणमित्यत्र विशेष्यतावच्छेदकत्वं सम्बन्धः स च सम्बन्धो रजतत्वादिनिष्ठः रागादिनिष्ठविशेष्यतात्वे रजतत्वादिनिष्ठावच्छेदकतानिरूपकतावच्छेदकत्वाभ्युपगमात् तत्र च तेन प्रत्यक्षभ्रमात् ।

( २ ) तदवच्छेदकयोः—कारणतावच्छेदककार्यतावच्छेदकयोः ।

(३) अवश्यनिवेश्यतयेति । अन्यथा देवदत्तरागस्य विशेष्यतावच्छेदकत्वसम्बन्धेन रजतत्वे सत्त्वेन यज्ञदत्तस्य रजतत्वे विशेष्यतावच्छेदकतासम्बन्धेन भ्रमापत्तिरिति भावः । एवं च तत्पुरुषीयत्वनिवेशापेक्षया लाघवेन समवायेन रजतरागः समवायेन रजतं प्रति कारणम् इति कार्यकारणभावः कल्प्यः इति समवायेनात्मनि रजतोत्पत्तिः, ननु रजतस्यात्मनिष्ठत्वे कथमिदं रजतमिति पुरोवर्तितादात्म्यमिति चेदुच्यते—न्यायमते आत्मनिष्ठसुखादेः मम देहः सुखीत्येवं शरीरनिष्ठत्वेनोपलम्भवत् चैतन्यमात्रस्य रजतं प्रत्यधिष्ठानतया इदमवच्छिन्नचैतन्यस्य तदधिष्ठानत्वेन इदमोऽवच्छेदकतया रजतस्य पुरोवर्तिसंसर्गप्रत्ययस्योपपत्तिरिति ।

(१)अथ तत्र रजतादेः शुद्धसमवायेन कार्यत्वे इदंत्वविशिष्टाद्यवच्छेदेनात्मसमवायनियमासम्भवः समवायस्य तदवच्छिन्नतानियामककारणकल्पने तु गौरवमिति चेन्न—अवच्छेदकतासम्बन्धेनेदंत्वादिविशिष्टावच्छिन्नं प्रतीदंत्वादिना तादात्म्येन हेतुत्वस्य संयोगादेरिदमाद्यवच्छिन्नत्वनियमाय क्लृप्तत्वेन तत एव रागादिजन्यरजतादेरिदमाद्यवच्छेदनियमसिद्धेः, अन्त्यावयविनामपि घटादीनां पटाद्यनुयोगिकवाद्यादिसंयोगाद्यवच्छेदकत्वानुभवेन तेषामपि स्वावच्छिन्नस्य अवच्छेदकतयोत्पत्तौ हेतुत्वस्य क्लृप्तत्वात्, गुणादौ रागादिपुरुषदोषजन्यभ्रमे मानाभावेन गुणादेः स्वावच्छिन्नहेतुत्वस्याक्लृप्तत्वेपि क्षतिविरहात्, वस्तुतस्तु रागादिपुरुषदोषजन्यरजतादेर्गुणाद्यवच्छिन्नात्मसमवेतत्वनियामककल्पने फलमुखत्वादेव न गौरवं दोषः ।

एतेन स्वप्नादिभ्रमे इदं रजतमित्याद्याकारके इदंत्वादिमतो रजतादेश्च द्वयोरप्यारोपात्, तत्र तस्य स्वावच्छिन्नं प्रति हेतुत्वस्याक्लृप्तत्वेन तत्कल्पने गौरवमिति परास्तम्, इदमादिरजताद्योः परस्परावच्छिन्नत्वनियामककल्पनस्य फलमुखत्वात् ।

एवञ्च विषयगतप्रत्यासत्त्या दोषस्य कारणत्वस्थलेपि तत्पुरुषेणारोपितस्यान्येनापि ग्रहणवारणाय तत्पुरुषसमवेतत्वेन चाकचि-

---

(१) अथ तत्रेति । आत्मनीत्यर्थः । इदंत्वावच्छिन्ने संयोगस्य अवच्छेदकतासम्बन्धेनोत्पन्नत्वात् अवच्छेदकतासम्बन्धेन इदंत्वविशिष्टावच्छिन्नं प्रति तादात्म्येन इदंत्वावच्छिन्नस्य कारणता क्लृप्तेति तत एव इदन्त्वावच्छेदेनात्मनि रजतसमवायः सेत्स्यतीति न नियामकान्तरकल्पनमिति भावः ।

क्ष्यदर्शनत्वादिकारणतावच्छेदकमिव रजतत्वादिकं कार्यतावच्छेदकमपि विशिष्यताम् , चाक्षुषत्वादिना तत्र दोषकार्यत्वाङ्गीकारेपि तत्र तद्विशेषणस्यावश्यकत्वात् , अन्यथैकपुरुषीयदोषादन्यपुरुषीयचाक्षुषादिभ्रमापत्तेः, जपाकुसुमादिसन्निधानदोषस्य हेतुतास्थले स्फटिकलौहित्यादेरेकस्यैव सर्वैर्ग्रहणे क्षतिविरहेण मन्मते कार्यतावच्छेदके तदनिवेशात् ।

अथ विषयनिष्ठप्रत्यासत्त्या दोषहेतुतास्थले रजतादिनिष्ठकार्यता केन सम्बन्धेनेति चेत्—येन सम्बन्धेन रजतादेश्चाक्षुषादिभ्रमप्रकारता तेनैव, तर्हि समवायेन रजतादिप्रकारकभ्रमस्थले समवायेन रजताद्युत्पत्तेरसम्भवः-तत्र क्लृप्तकारणताकस्य रजतावयवतत्संयोगादेरभावात् ।

(१) अथान्यथाख्यातिमते प्रत्यक्षे संप्रयोगदोषयोरिव मन्मतेपि रजतादौ तदवयवादिदोषयोर्विकल्पेन हेतुत्वमिति चेत् तर्ह्यन्यथाख्यातिमते षोढा सन्निकर्षाणां कार्यतावच्छेदके चाक्षुषत्वादौ स्वविशिष्टत्वनिवेशापेक्षया भवन्मते रजतत्वघटत्वपटत्वाद्यनन्तधर्मेषु रजतावयवकपालतन्तुतत्संयोगादीनां कार्यतावच्छेदकेषु तद्विशिष्टत्वनिवेशे महा-

(१) अन्यथाख्यातिमत इति । रजतचाक्षुषस्य दोषेण इन्द्रियेण संप्रयोगेण च जननात् परस्परव्यभिचारवारणाय दोषविशिष्टरजतचाक्षुषं प्रति दोषः चक्षुःसंयोगविशिष्टचाक्षुषं प्रति चक्षुःसंयोगः कारणम् । अनिर्वचनीयख्यातिमते च रजतं प्रति दोषस्य रजतावयवस्य च कारणतया परस्परव्यभिचारवारणाय दोषविशिष्टरजतं प्रति दोषस्य रजतावयवविशिष्टरजतं प्रति रजतावयवस्य कारणत्वं वाच्यमिति भावः ।

गौरवम्, एवं स्पर्शवत्त्वेन भूतचतुष्टयमात्रवृत्तिजातिविशेषेण वा समवायेन जन्यद्रव्यं प्रति, पृथ्वीत्वादिना गन्धादिकं प्रति हेतुत्वस्य क्लृप्तत्वादात्मनि समवायेन द्रव्यगन्धाद्युत्पत्त्यसम्भवेन तादृशहेतुतानिरूपितकार्यतावच्छेदकं तादृशकारणवैशिष्ट्येन विशेषणीयमिति महागौरवमिति चेन्मैवम्—अन्यथाख्यातिमते हि रजतादिप्रकारतानिरूपितसंसर्गतानिरूपितविशेष्यतादिसम्बन्धेन दोषकार्यत्वे वाच्ये रजतादिनिष्ठत्व प्रकारतात्वयोस्तादृशप्रकारतात्वनिरूपितत्वसंसर्गतात्वयोस्तादृशसंसर्गतानिरूपितत्वविशेषतात्वयोर्विशेष्यविशेषणभावे विनिगमकाभावाद्धेतुहेतुमद्भावबाहुल्येन मन्मतापेक्षयापि महागौरवम्, अवयवतत्संयोगाद्यपेक्षया दोषाणामनन्तानां कार्यतायामवयवतत्संयोगादिकार्यतावच्छेदकीभूतानां रजतत्वादीनां सर्वेषामेव सम्बन्धावच्छेदकतया (१)तत्तद्दोषविशिष्टचाक्षुषत्वादीनां चावच्छेदकतया निवेशात् कार्यतावच्छेदकसम्बन्धस्य सर्वत्र गुरुशरीरत्वाच्च ।

अथ (२)सम्बन्धतावच्छेदकमनिवेश्यैव सम्बन्धो वाच्यः

---

(१) सम्बन्धतावच्छेदकतयेति । अयं भावः—अनिर्वचनीयरजतोत्पत्तिवादिमते तत्तद्दोषविशिष्टरजतं प्रति दोषः कारणम् अवयवसंयोगविशिष्टरजतं प्रति अवयवसंयोगः कारणमिति कार्यकारणभावाद्रजतत्वं कार्यतावच्छेदकम् । तच्च अन्यथाख्यातिमते रजतप्रकारतानिरूपितसंसर्गतानिरूपतविशेष्यतासम्बन्धेन तत्तद्दोषविशिष्टचाक्षुषं प्रति तत्तद्दोषः कारणमिति कार्यकारणभावात सम्बन्धतावच्छेदकं, चाक्षुषत्वं च कार्यतावच्छेदकमिति गौरवमिति भावः ।

(२) अथेति । ज्ञानभेदेन विशेष्यताव्यक्तीनां भेदाद्‌ विशेष्यतासम्बन्धेन दोषविशिष्टचाक्षुषं प्रति दोषः कारणमिति स्वीकारेण

[एक(१)स्माद्दोषान्नानाचाक्षुषोत्पत्तिस्थले तत्तज्ज्ञानभेदेन विशेष्यताभेदात्तत्तद्विशेष्यताव्यक्तिसंबन्धेन तत्तद्दोषविशिष्टचाक्षुषत्वं कार्यतावच्छेदकं वाच्यम् तथा चैकजातीयसंबन्धेन कार्यतावच्छेदकावच्छिन्नंप्रति वर्तमानाभावस्य प्रतियोगितानवच्छेदकधर्मवत्त्वेनकारणत्वस्यानुगमेन] सम्बन्धाननुगमस्यादोषत्वात् ज्ञानभेदेन भिन्नानामपि तत्तद्विशेष्यताव्यक्तीनां सम्बन्धत्वसम्भवादिति चेन्न—सम्बन्धाननुगमे कारणत्वैक्यस्य वक्तुमशक्यतया सम्बन्धतावच्छेदकस्यावश्यकत्वात्, अन्यथा प्रकारविधयाऽवच्छेदकाननुगमस्याप्यदूषणत्वापत्तेः, दोषजन्यरजताद्यप्रतियोगिकसमवायादी(२)नामननुगतानामेव रजतावयवादिकार्यतावच्छेदकत्वस्य मयापि वक्तुं शक्यत्वेन मन्मतेपि गौरवानापत्तेश्च ।

अथ ज्ञानभेदेऽपि विषयत्वाभेदस्वीकारादुक्तविशेष्यताव्यक्तेश्चाक्षुषादिव्यक्तिभेदेप्येकत्वात्तद्व्यक्तित्वेनैव सम्बन्धत्वं तस्या वाच्यं रजतत्वावच्छिन्नप्रकारतायाः सम्बन्धतावच्छेदकाघटकत्वेपि

---

रजतत्वादीनां न कार्यतावच्छेदकसम्बन्धे निवेशः इति न गौरवमिति भावः ।

(१) [ ] 'एतच्चिह्नान्तर्गतः पाठः पुस्तकान्तरस्थः ।

(२) मयापीति । यथाऽननुगतसम्बन्धस्यैव कार्यतावच्छेदकसम्बन्धत्वं त्वयाङ्गीक्रियते तथा अनिर्वचनीयरजतोत्पत्तिवादिना मयापि दोषजन्यरजताप्रतियोगिकसमवायेन रजतं प्रति अवयवसंयोगः, अवयवसंयोगजन्यरजताप्रतियोगिकसमवायेन रजतं प्रति दोषः कारणमिति अननुगतसमवायस्य कार्यतावच्छेदकसम्बन्धत्वाङ्गीकारेण कार्यतावच्छेदककोटौ कारणवैशिष्ट्यनिवेशो न करिष्यत इति गौरवाभाव इति भावः ।

वस्तुगत्योक्तविशेष्यतानिरूपकत्वाद् दोषनियम्यत्वमिति चेन्न-उक्त-प्रकारताव्यक्तेर्लौकिकत्वस्य वा कार्यतावच्छेदकाघटकत्वे आकस्मिकतापत्तेः, एकधर्मावच्छिन्नविशेष्यताव्यक्तेरेकत्वेपि परस्परा(१)नधिकरणवृत्तिनानाधर्मावच्छिन्नविशेष्यताकभ्रमोत्पादकैकजातीयदोषस्थले तादृशधर्मसमसंख्याकानां तज्जातीयदोषकार्यत्वानां तज्जातीय दोषविशिष्टत्वेन तत्तद्विशेष्यताव्यक्तिसम्बन्धैर्वाच्यत्वेनातिगौरवात्स्वावच्छेदकसम्बन्धभेदेन कार्यताभेदस्यावश्यकत्वाद्रजतत्वावच्छिन्नलौकिकप्रकारतानिरूपिततादात्म्यसांसर्गिकविषयतानिरूपितविशेष्यतात्वेन लौकिकतत्प्रकारताव्यक्तिनिरूपितविशेष्यतात्वेन वा सम्बन्धत्वस्योक्तावुक्तधर्मसमसंख्याककार्यत्वाभावेपि सम्बन्धघटकानां विशेषणविशेष्यभावाविनिगम्यत्वेनोक्तगौरवस्यावश्यकत्वात्तदपेक्षया लाघवेन तज्जातीयदोषविशिष्टरजतत्वेन तादात्म्यसम्बन्धेनोक्तकार्यत्वस्यैव युक्तत्वात्,

किञ्च भ्रमस्थले मन्मते कपालादिकं विनापि घटादेरुत्पत्त्या कपालादिकार्यत्वस्य घटत्वादिनोक्तौ व्यभिचारापत्त्या कपालादिविशिष्टघटत्वादिना तत्स्वीकाराद्गौरवं त्वयोक्तं तव तु तदपेक्षयाऽपि गौरवम् तथा हि-गोत्वघटत्वादिप्रत्यक्षेषु सास्नाकम्बुग्रीवाद्यवच्छिन्नेन्द्रियसंयोगवत्समवायस्य, ब्राह्मणत्वादिप्रत्यक्षे विशुद्धमा-

---

(१) परस्परेति । परस्परानधिकरणवृत्तयो ये नानाधर्मा रङ्गत्वरजतत्वादयः तदवच्छिन्नविशेष्यताको भ्रमः रङ्गरजते इत्याकारकस्तत्स्थल इत्यर्थः ।

तापित्तृकत्वादिनिश्चयस्य, शुक्तित्वादिप्रत्यक्षे नीलपृष्ठत्वादिनिश्चयस्य, उत्पलादिनैल्यचाक्षुषे सौरभादिसंयुक्तसमवायस्य, जलशैत्यादिचाक्षुषे रजतादिपात्रवृत्तिजलादिसमवायस्य, सक्त्वादिरासने जलसंयुक्तसमवायस्य, कुङ्कुमगन्धघ्राणजे घृतादिसंयुक्तसमवायस्य, स्पर्शप्रत्यक्षे अदुष्टत्वक्संयुक्तसमवायस्य, व्यासज्यवृत्तिसंख्यादिप्रत्यक्षे इन्द्रियसंयुक्तसमवेतत्वस्य, हस्तादिपरिमाणप्रत्यक्षे हस्तादिपरिमितदेशावच्छिन्नेन्द्रियसंयोगवत्समवायस्य, एवमन्यप्रत्यक्षेपि तस्य तस्य कारणत्वं वाच्यम्, तत्रापि गोत्ववृत्तिविशेष्यतादिविषयताः गोत्ववृत्तिलौकिकविषयतात्वेनानुगमय्य तदवच्छिन्नसम्बन्धेन चाक्षुषत्वावच्छिन्नं प्रति सास्नावच्छिन्नविजातीयसंयोगवत्प्रतियोगिकगोत्वनिष्ठसमवायत्वेन हेतुत्वं वाच्यम् भ्रमस्थले व्यभिचारापत्त्योक्तसमवायस्य स्वविशिष्टचाक्षुषत्वावच्छिन्नं प्रत्येवोक्तहेतुत्वं वाच्यम्, एवमन्येषामप्युक्तानां स्वविशिष्टतत्तद्धर्मावच्छिन्नं प्रत्येवोक्तहेतुत्वं वाच्यम्, तथा च तत्तत्कारणतावच्छेदकघटकानां विशेषणविशेष्यभावस्याविनिगम्यत्वेनावच्छेदकभेदेन कार्यकारणभावानन्त्यस्यावश्यकत्वान्महागौरवं मन्मते तु भ्रमस्याविद्यावृत्तित्वेन चाक्षुषत्वाद्यभावेनोक्तकारणाकार्यत्वेनोक्तकारणकार्यतावच्छेदके तद्वैशिष्ट्यस्य न निवेशः।

अथ वा समवायेन रजताद्युत्पत्तौ क्लृप्तकारणस्या(१)भावात्तेन

(१) क्लृप्तकारणस्य—रजतावयवस्य।

सम्बन्धेन भ्रमस्थले रजताद्युपत्त्यसम्भवादवच्छेदकतासम्बन्धेनैव(१) द्रव्यगुणकर्मणां दोषकार्यता वाच्या ।

न च नव्यतार्किकमते(२) (चित्र) रूपादीनामप्यव्याप्यवृत्तित्वेनावच्छेदकतासम्बन्धेनावयवेषूत्पत्त्या पूर्वोक्तव्यभिचार इति वाच्यम् नव्यतार्किकमते (चित्र) रूपादीनामवयविनि साक्षात्सम्बन्धेन (३)अवच्छेदकतासम्बन्धेनावयवेषूत्पत्तिस्वीकारात् शक्तिविशेषविशिष्टत्वेन तादात्म्यसम्बन्धेन चाक्षुषहेतुत्वेन रूपस्य तदहेतुत्वात् दैशिकविशेषणतादिसम्बन्धेन वा दोषकार्यता वाच्या रूपादेर्विशेषणतासम्बन्धेन सा वाच्या ध्वंसादेस्तु अवच्छेदकतासंबन्धेन समवायादिसंबन्धेन वा ।

न च विशेषणतादिसंबन्धेन रूपादेर्भ्रमविशेष्यतत्तदधिकरणे विशिष्टबुद्ध्यापत्तिरिति वाच्यम् तेन संबन्धेन बाधाभावसत्त्वे सर्वेषामपि तथा स्वीकारात् ।

नचैवं दोषजन्यद्रव्यगुणकर्मणां दोषरहितेनापि ग्रहणापत्तिरिति

---

(१) अवच्छेदकतासम्बन्धेनैवेत्येवकारेण समवायव्यवच्छेदः तेन न व्यभिचारशङ्कावकाश इति भावः ।

(२) *नव्यतार्किकेति*। तथा च विश्वनाथः—'नव्यास्तु तत्राव्याप्यवृत्त्येव नानारूपं पीतादीनां प्रतिबन्धकत्वकल्पने गौरवात्' इति ।

अत एव 'लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः । श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते' इति स्मृतिवचनं सङ्गच्छते । अत्रावच्छेदकत्वं सप्तम्यर्थ इति ।

(३) साक्षात्सम्बन्धेन --समवायेन ।

वाच्यम् भट्टमते विषयसमवेतज्ञाततायामिव(१) तेषु स्वग्राहकपुरुषाणां निरूपितत्वाख्यसम्बन्धविशेषमङ्गीकृत्य तत्तत्पुरुषनिरूपितविषयकमत्यक्ते तत्तत्पुरुषत्वेन हेतुताङ्गीकारात् अन्यथा त्वन्मतेऽपि एकपुरुषीयापेक्षाबुद्धिजन्यद्वित्वपरत्वादीनां पुरुषान्तरेण ग्रहणापतेः प्रकारान्तरेण (२)तादृशापत्तिवारणापेक्षया स्वोपक्षाबुद्धिजन्यद्वित्वादिषु तत्पुरुषाणां निरूपितत्वसम्बन्धकल्पनयोक्तहेतुत्वकल्पनस्यैव युक्तत्वात्, उपदर्शितलाघवानुग्रहात् संयोगादिना सम्बन्धेन गुणादौ कर्म्मादिप्रकारकधीस्थलेषु कर्मादेरिव संयोगादेरपि गुणाद्यवच्छेदेनोत्पत्तिः।

न च यत्र (३)यस्य कोपि सम्बन्धो न वास्तवः प्रसिद्धस्तदवच्छेदेन तस्य तत्सम्बन्धस्य च भासमानस्योत्पत्तिर्यत्र तु यस्य स प्रसिद्धस्तयोः समवायादिना विशिष्टबुद्धिस्थले प्रसिद्धसम्बन्धावच्छेदेन समवायत्वादिकमेव जायते, सर्वत्रैव वा भ्रमस्थले रजतत्वादिधर्म एव जायत इत्येव कुतो नोच्यत इति वाच्यम्, अपूर्वस्य समवायत्वादेः रजतत्वादेर्वा धर्मस्योत्पत्त्यङ्गीकारे पूर्वानुभूतसमवायत्वादिना विशिष्टसम्बन्धेन रजतादिविशेषणविशिष्टपूर्वानुभूतरजतत्वादिविशिष्टं वेच्छतां भ्रमस्थले प्रवृत्त्युपपत्तेः, सामान्यविशेषसमवा-

---

(१) तत्पुरुषनिरूपितज्ञातता यत्र तादात्म्येन जायते तत्र विषयतासम्बन्धेन ज्ञानं कारणम्।

(२) प्रकारान्तरेणेति। तत्पुरुषीयापेक्षाबुद्धिजन्यद्वित्वप्रत्यक्षे तत्पुरुषस्तादात्म्येन कारणमिति प्रकारेणेत्यर्थः।

(३) यत्रेति। तज्जलपरमाणुवृत्तिरूपे तत्पार्थिवपरमाणुवृत्तिक्रियाभ्रम इत्यर्थः।

यानां तु समवायादिना दोषकार्यत्वेपि न क्षतिः, तेन सम्बन्धेन तदुत्पत्तौ कारणान्तरस्याक्लृप्तत्वेन बाधकाभावात् ।

अथावच्छेदकतासम्बन्धेन समवायादिसम्बन्धेन वा रजतादेरुत्पत्त्यङ्गीकारेपि इदंरजतमित्यादि भ्रमज्ञानीयविषयतानामवच्छेदकभावे किं नियामकमिति चेत्—इदन्त्वाद्यवच्छिन्नविशेष्यतानिरूपिततादात्म्यादिसंसर्गतानिरूपितरजतत्वाद्यवच्छिन्नप्रकारताशालिचाक्षुषादौ तादृशविशेष्यतानिरूपितरजतत्वाद्यवच्छिन्नप्रतियोगिताकभेदत्वाद्यवच्छिन्नप्रकारताशालिनिश्चयरूपबाधाभाव एव नियामकः ।

अथ निर्धर्मितावच्छेदकभ्रमस्थले बाधाभावस्य न नियामकत्वं धर्मितावच्छेदकान्तर्भावेनैव तस्य तथात्वादिति चेत्, का क्षतिः विशेषणज्ञानसन्निकर्षादेरेव तत्र नियामकत्वसम्भवात् ।

न च समवायेन द्रव्यगुणकर्मणां द्रव्यगुणकर्मसु भ्रमस्थले द्रव्याद्यनुयोगिकसमवायेऽवच्छेदकतासम्बन्धेनोत्पद्यमानद्रव्यादिप्रतियोगिकत्वाभावेन तस्य सम्बन्धतया भानानुपपत्तिरिति वाच्यम् । तत्प्रतियोगिकत्वाभावेपि (१)बाधाभावसन्निकर्षादिसामग्रीतस्तस्य सम्बन्धतया त्वन्मत इव भानसम्भवात् ।

नचावच्छेदकतासम्बन्धस्याप्युक्तसामग्रीत उक्तस्थले भानापत्तिरिति वाच्यम् ,उक्तसामग्रीसत्त्वे त्वयापि तस्येष्टत्वात् ।

---

(१) तत्प्रतियोगिकत्वाभावेऽपीति । कपालाद्यनुयोगिकसमवाये पटादिप्रतियोगिकत्वाभावेऽपि कपालाद्यनुयोगिकसमवायविशेष्यकपटादिप्रतियोगिकत्वाभावप्रकारकबाधबुद्ध्यभावसत्त्वे तस्य तदीयतया भानं तद्वदित्यर्थः ।

यद्यपीदं रजतमित्यादौ स्वाप्नभ्रमे सम्प्रयोगाभावेन बहिर्विषयभानासम्भवात्तद्विषयनिष्ठप्रत्यासत्त्या दोषाणां न हेतुत्वम् तथापि निद्राधातुवैषम्यादिदोषाणामात्मनिष्ठतयैव हेतुत्वम् , इदन्त्वादिना रजतत्वादिना च समवायेन निरूपकत्वेन वा कार्यत्वमिदमादेर्भासमानस्वाप्नदेहावच्छिन्ने मानाभावादहमिदन्त्वविशिष्टवानित्यादिप्रत्ययानापत्तिर्निधर्मितावच्छेदकके च स्वाप्ने भ्रमे तत्तत्पुरुषादेरेव नियामकत्वम् , तत्तत्पुरुषसमवेतस्य तत्तत्पुरुषनिरूपितस्य चाक्षुषप्रत्यक्षे तत्तत्पुरुषाणां तत्तत्पुरुषसमवेतमानसे शक्तिविशेषविशिष्टत्वेन धर्मादेस्तादात्म्येन प्रतिबन्धकत्वेन तद्भेदस्य च हेतुत्वात् , तेन मानसप्रत्यक्षे सम्प्रयोगहेतुत्वानङ्गीकारेपि न क्षतिः, पूर्वपूर्वस्वाप्नादेरुत्तरोत्तरस्वाप्नहेतुत्वाच्च युगपदेव तत्तद्विषयाणां स्वाप्नभ्रमः ।

ननु मानसप्रत्यक्षे धर्मादिभेदस्यैव विशेषकारणत्वाच्चाक्षुषभ्रमविषयरजतादावपि मानसापत्तिरिति चेन्न इष्टत्वात् , पराभ्युपगतचाक्षुषमानसादिविषयत्वानां मिथोविरोधस्य निष्प्रमाणकत्वात् , किञ्च रजतत्वादिचाक्षुषादिभ्रमस्थले इदन्त्वादिविशिष्टधर्म्मादिविषयकं चाक्षुषादिकं पूर्वसिद्धमस्ति, तथा च तत्सम्बद्धतया रजतादिविषयस्यैवोत्पत्तिर्देशान्तरगतपूर्व सिद्धरजतादिसम्बद्धतया चाक्षुषादेर्वोत्पत्तिरित्यत्र विनिगमकाभावेन रजतादेरुत्पत्तिक्षणेऽपि चाक्षुषादिविषयत्वसम्भवः ।

न च विनश्यदवस्थेन धर्म्यादिचाक्षुषादिना जनितभ्रमस्थले तदसम्भव इति वाच्यम् , तत्रापि तादृशचाक्षुषाद्युत्पत्तिक्षणे तदुत्तर-

त्तणे वा तादृशचाक्षुषाद्यन्तरस्योत्पत्तिसम्भवेन तत्रैव रजताद्युत्पत्तिसम्भवात्, गुडादौ(१) तिक्तरसादेर्गगनादौ नैल्यादेर्भ्रमस्थले च यद्यपि गुडादिगोचररासनचाक्षुषाद्यसम्भवस्तथापि रसनागतजलादिरसरासनादेर्गगनगतालोकादिचाक्षुषादेश्च सत्त्वात्तत्रैवो(२)पनीतगुडगगनादि(विषयके) विशेषके तिक्तरसनैल्याद्युत्पत्तिः सम्भवत्येव ।

## अनिर्वचनीयरजतस्य दोषकार्यत्वे गौरवपरिहारः ।

नन्वेवं विषयनिष्ठदोषस्य चाक्षुषादिगतपरम्परासम्बन्धेन(३) हेतुत्वं विषयितया रजतादेः कार्यत्वं वाच्यं तथा च गौरवमिति चेन्न, रजतादिप्रकारतानिरूपितसंसर्गतानिरूपितविशेष्यतासम्बन्धेन तत्पुरुषीयचाक्षुषत्वादिना कार्यत्वापेक्षया स्वप्रकारतानिरूपितसंसर्गतानिरूपिता या तत्पुरुषीयचाक्षुषविशेष्यता तत्सम्बन्धेन रजतत्वादिना कार्यत्वे गौरवाभावात् ।

---

(१) ननु किंचेत्यादिग्रन्थेन इदन्त्वादिधर्मिविशिष्टचाक्षुषे निरूपकतासम्बन्धेन रजतोत्पत्तिं समर्थ्य रजतोत्पत्तिक्षणेऽपि रजतचाक्षुषं समर्थितं तच्च गुडादौ तिक्तरसादिभ्रमे न संभवति गुडादे रासनादिप्रत्यक्षासम्भवेन तत्र निरूपकतासम्भवेन रसाद्युत्पत्त्यसम्भवादित्याह गुडादाविति ।

(२) तत्रैवेति । रसनागतजलरसरासने, गगनगतालोकादिचाक्षुषे चेत्यर्थः, तत्र निरूपकतासम्बन्धेन तिक्तरसाद्युत्पत्तिरिति यावत् ।

(३) परम्परासम्बन्धेनेति । विषयितासम्बन्धेन रजतं प्रति स्वाश्रयविषयकत्वसम्बन्धेन दोषः कारणमिति कार्यकारणभावेन चाक्षुषादौ रजताद्युत्पत्तिरिति भावः ।

न च तत्पुरुषचाक्षुषनिरूपितत्वस्य सम्बन्धघटकत्वेन निवेशे प्रकारतासंसर्गतयोर्विशेषणतया तन्निवेशमादाय विनिगमनाविरहेण-कार्यकारणभावत्रयापत्त्या गौरवात् तत्पुरुषचाक्षुषत्वं न सम्बन्धघटकं किन्तु कार्यतावच्छेदकमेवेति वाच्यम् , तत्पुरुषचाक्षुषत्वादिना कार्यताभ्युपगमेपि विनिगमनाविरहेण तत्पुरुषचाक्षुषनिरूपितप्रकारतादिघटितप्रत्येकसम्बन्धमादाय(गौरवेण) रजतत्वादिना कार्यत्वानुक्तौ युक्त्यभावात्(१) ।

न च तत्पुरुषीयचाक्षुषनिरूपितविषयान्तरनिष्ठा या प्रकारता तस्या एव सम्बन्धघटकत्वं वाच्यम् अन्यथा रजतादौ पूर्वं तत्पुरुषीयचक्षुरादिसन्निकर्षं विना तत्पुरुषीयचाक्षुषप्रकारत्वासम्भवेन स्वनिष्ठतादृशप्रकारताघटितसम्बन्धेन(२) रजताद्युत्पत्त्यसम्भवात् विषयान्तरनिष्ठप्रकारतायाश्च रजतादिप्रकारतातो भेद आवश्यकस्तदवच्छेदकरजतत्वादिधर्मतादात्म्यादिसम्बन्धानवच्छिन्नत्वादिति वाच्यम् , अवच्छेदकभेदेन प्रकारताया भेदानभ्युपगमेनैकस्या एव प्रकारताया नानाधर्मसम्बन्धनिष्ठावच्छेदकतानिरूपकत्वसम्भवात् ।

नचेदं रजतमित्यादिभ्रमस्थले रजतत्वादिनेदन्त्वादि प्रकार इति व्यपदेशापत्तिरिति वाच्यम् , इदन्त्वादिनिष्ठप्रकारतात्वे (३)रज-

(१) युक्त्यभावादिति । तव कार्यतावच्छेदकसम्बन्धलाघवं मम कार्यतावच्छेदकधर्मलाघवमित्युभयोः साम्यमिति भावः ।

(२) स्वनिष्ठतादृशप्रकारताघटितेति । स्वप्रकारतानिरूपितसंसर्गतानिरूपिता या चाक्षुषादिविशेष्यता तत्संबन्धेनेत्यर्थः ।

(३) इदन्त्वादिनिष्ठप्रकारतात्वे इति । इदन्त्वनिष्ठप्रकारताया र-

तत्वादिनिष्ठावच्छेदकतानिरूपकतावच्छेदकत्वस्योक्तव्यपदेशविषयस्यानभ्युपगमात् । किञ्चावच्छेदकभेदेन प्रकारताभेदेपि यथा समवायनानात्वपक्षे स्वसमवायस्य घटादौ पूर्वमसिद्धत्वेपि अवयवरूपादिकारणबलादेव स्वसमवायिघटादिसमवायित्वसम्बन्धेन रूपादिकं कपालादौ जायते तथा स्वप्रकारकचाक्षुषादेः पूर्वमसिद्धत्वेऽपि दोषादिकारणबलात् स्वप्रकारकचाक्षुषादिविशेष्यत्वसम्बन्धेन रजतादेरुत्पत्तौ बाधकाभावः ।

अथवा विषयनिष्ठस्य दोषस्य स्वाश्रयविशेष्यतानिरूपितसंसर्गतात्वसम्बन्धेन स्वाश्रयनिष्ठविशेष्यतात्वसम्बन्धेन वा हेतुत्वम् , तत्पुरुषचाक्षुषनिरूपितस्वप्रकारतानिरूपितत्वसम्बन्धेन तादृशनिरूपितत्ववत्संसर्गतानिरूपितत्वसम्बन्धेन वा रजतत्वादिना कार्यता तत्पुरुषीयचाक्षुषीया या स्वाश्रयनिष्ठविशेष्यता तत्त्वसम्बन्धेन दोषस्य कारणत्वं तत्पुरुषीयचाक्षुषीयस्वप्रकारतानिरूपितसंसर्गतानिरूपितत्वसम्बन्धेन रजतादेः कार्यत्वमिति ।

ननु तत्र प्रकारतायां रजतत्वाद्यवच्छिन्नत्वमपि निवेश्यम् अन्यथा तन्नियमासिद्ध्यापत्तेः तथा च रजतत्वादेर्द्विधा निवेशे

---

जतनिष्ठप्रकारतायाश्चैक्येन रजतत्वनिष्ठावच्छेदकतानिरूपकत्वस्य इदन्त्वनिष्ठप्रकारतायां सत्त्वेऽपि गुणादिनिष्ठाधिकरणतानिरूपकतावच्छेदकत्वस्य विशिष्टसत्तात्वे इव रजतत्वनिष्ठावच्छेदकतानिरूपकतावच्छेदकत्वस्य इदन्त्वनिष्ठप्रकारतात्वेऽनभ्युपगमेन विशिष्टसत्तावान् गुण इति व्यवहारस्येव रजतत्वावच्छिन्नप्रकारताश्रय इदन्त्वम् (रजतत्वेनेदन्त्वादि) प्रकार इति व्यवहारस्य नापत्तिरिति भावः ।

गौरवमिति चेन्न स्वा(अ)न्यावच्छिन्नप्रकारतायाः रजतत्वावच्छिन्नं प्रति सम्बन्धत्वाभावेन तन्निवेशे प्रयोजनाभावात् तस्य(१) बाधाभावादिनियम्यत्वाच्च ।

यद्वा स्वलौकिकविषयता(२)शालितत्पुरुषीयचाक्षुषविशेष्यत्वसम्बन्धेनैव रजतत्वादिना विषयदोषकार्यत्वं, रजतादिप्रकारताया इदन्त्वाद्यवच्छिन्नविशेष्यतानिरूपकत्वादिकन्तु (इदं रजतं नेति) बाधाभावादिनियम्यम् ।

## अनिर्वचनीयरजतस्य यौक्तिकत्वम् ।

आत्मनिष्ठप्रत्यासत्त्या दोषस्य कारणत्वे स्वचाक्षुषादिसमवायेन स्वचाक्षुषादिना वा सम्बन्धेन रजतत्वादिनैव कार्यत्वसम्भवः । एवमारोप्यमाणरजतादिव्यधिकरणशुक्तीदन्त्वाद्यवच्छिन्नविशेष्यताकभ्रमस्थले बाधाभावकार्यत्वमपि रजतत्वादिनैवेति ततोप्यनिर्वचनीयख्यातिसिद्धिः, तथा हि—इदन्त्वाद्यवच्छिन्नविशेष्यतानिरूपित तादात्म्यादिसंसर्गतानिरूपितरजतत्वाद्यवच्छिन्नप्रकारताकचाक्षुषत्वादिना समवायेन बाधाभावजन्यत्वं(३) वाच्यम् । तथा च तादृश-

(१) तस्य—रजतत्वावच्छिन्नस्य । बाधाभावादीति । इदं रजतं नेति बाधाभावादीत्यर्थः ।

(२) स्वलौकिकविषयता—रजतादिनिष्ठलौकिकप्रकारता ।

(३) बाधाभावजन्यत्वमिति । इदंत्वावच्छिन्नविशेष्यतानिरूपितविशेषणतानिष्ठसंसर्गतानिरूपितरजतप्रकारताशालि चाक्षुषं बाधः तदभावजन्यत्वमित्यर्थः ।

संसर्गतानिरूपितस्वप्रकारताशालिचाक्षुषसमवायसम्बन्धेनता दृश चाक्षुषसम्बन्धेन वा रजतत्वादिनैव तदुच्यताम् रजतत्वाद्यवच्छिन्नत्वस्य चाक्षुषीयसमवायस्य चानिवेशेन लाघवात् ।

ननु पुरुषापेक्षया(१) धर्मितावच्छेदकानामनन्तत्वेन धर्मितावच्छेदकमनिवेश्य तत्तत्पुरुषीयचाक्षुषत्वादिना रजतत्वाद्यवच्छिन्नप्रकारता-

(१) पुरुषापेक्षयेति । अयं भावः—आत्मनिष्ठप्रत्यासत्त्या रजतबाधाभावयोः कार्यकारणभावे कार्यतावच्छेदककारणतावच्छेदकोटौ धर्मितावच्छेदकनिवेश आवश्यकः अन्यथा रजतप्रकारताशालिचाक्षुषसमवायवत्यात्मनि सर्पोत्पत्त्यापत्तिः । रजतचाक्षुषबाधाभावयोः कार्यकारणभावाङ्गीकारे च पुरुषान्तरीयबाधाभावेन पुरुषान्तरीय रजतचाक्षुषवारणाय तत्पुरुषीयत्वं निवेश्य रजतत्वावच्छिन्नप्रकारता निरूपिततादात्म्यादिसंसर्गतानिरूपितविशेष्यतावच्छेदकतासम्बन्धेन तत्पुरुषीयचाक्षुषत्वावच्छिन्नं प्रति स्वीयविशेष्यताविशेषावच्छेदकत्वसम्बन्धावच्छिन्न (इदं रजतं नेति रजतप्रतियोगिकभेदप्रकारतानिरूपितसंसर्गतानिरूपितविशेष्यतावच्छेदकत्वसंबन्धावच्छिन्न) प्रतियोगिताकचाक्षुषाभावरूपो यो बाधः तत्तत्पुरुषीयतदभावस्य कारणता वाच्या । एवं च आद्यकल्पे तत्तत्पुरुषत्वस्यापि धर्मितावच्छेदकतया तत्पुरुषीयत्वनिवेशकल्पापेक्षया कार्यकारणभावद्वैगुण्यम् तथा हि पुरुषदशकं विषयदशकं चानुसृत्य विचारणायामात्मनिष्ठप्रत्यासत्त्या कार्यकारणभावे तत्पुरुषत्वस्यापि धर्मितावच्छेदकत्वसम्बन्धेन कार्यकारणभावदशकं विषयनिष्ठतत्तद्धर्मस्य धर्मितावच्छेदकतया तद्भेदेन कार्यकारणभावदशकमितिविंशतिः कार्यकारणभावाः धर्मितावच्छेदकनिष्ठप्रत्यासत्त्या कार्यकारणभावे तु तत्तत्पुरुषभेदेन कार्यकारण भावदशकमेवेति ।

निरूपिततादात्म्यादिसंसर्गतानिरूपित(१)विशेष्यतावच्छेदकत्वसम्बन्धेन स्वीयविशेष्यताविशेषावच्छेदकत्वसम्बन्धावच्छिन्नप्रतियोगिताकबाधाभावजन्यत्वाङ्गीकारात् तत्पुरुषीयचाक्षुषादिनिरूपितस्वप्रकारतानिरूपितसंसर्गतनिरूपितविशेष्यतावच्छेदकत्वसम्बन्धेन रजतत्वेनोक्तजन्यत्वाङ्गीकारे रजतगतेदन्त्वद्रव्यत्वादावप्युक्तसम्बन्धेन रजतादेरुत्पत्त्यापत्तिरिष्टापत्तौ च गौरवात् बाधाभावजन्यता रजतत्वादिना वक्तुमशक्येति चेन्न—

धर्मितावच्छेदकस्येव संसर्गतावच्छेदकस्यापि संयोगसमवायतद्व्यत्संयोगत्वादिभेदेन पुरुषापेक्षयाऽऽनन्त्यादुक्तविशेष्यतावच्छेद-

(१) तादात्म्यादिसंसर्गतानिरूपितविशेष्यतेति। विनिगमनाविरहेण ससर्गतायां प्रकारतानिरूपितत्वस्येव विशेष्यतानिरूपितत्वमप्यङ्गीक्रियते, विशेष्यतायाः संसर्गत्वानिरूपितत्वे तु पर्वतो वह्न्यभाववानिति ज्ञानं प्रति स्वसंयोगिसंयोगसम्बन्धेन पर्वतो वह्निमानिति निश्चयस्य प्रतिबन्धकत्वापत्तिः न च प्रकारतायां संयोगत्वमात्रावच्छिन्नसंसर्गतानिरूपितत्वमेव प्रवेश्यतामिति वाच्यं तथा सति घटकालीनसंयोगेन पर्वतो वह्निमानितिनिश्चयस्य प्रतिबन्धकत्वं न स्यात् विशेष्यतायाः संसर्गतानिरूपितत्वपक्षे च वह्नित्वावच्छिन्नप्रकारतानिरूपितसंयोगत्वावच्छिन्नसंसर्गतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वेन प्रतिबन्धकता क्लृप्ता तथा च परम्परासम्बन्धस्थले परस्परनिरूप्यनिरूपकभावापन्नानामेव भवन्ति संसर्गताः इति तासु प्रथमा प्रतियोगिनिष्ठा प्रकारतानिरूपिता चरमा त्वनुयोगिनिष्ठविशेष्यतानिरूपितेति कथितस्थले वह्नित्वावच्छिन्नप्रकारतानिरूपितसंसर्गतया साक्षान्निरूपितत्वस्य विशेष्यतायामभावान्नोक्तापत्तिरिति ध्येयम्।

कत्वसम्बन्धेनेवेदन्त्वाद्यवच्छिन्नविशेष्यतानिरूपिता सती रजतत्वाद्यवच्छिन्नप्रकारतानिरूपिता या संसर्गता तदवच्छेदकत्वसम्बन्धेनापि विनिगमनाविरहेण तत्पुरुषीयचाक्षुषत्वादिनोक्तकार्यत्वस्य वाच्यतया तदपेक्षया लाघवेन तत्पुरुषीयचाक्षुषादिनिरूपितेदन्त्वाद्यवच्छिन्नविशेष्यतानिरूपिता या स्वप्रकारतानिरूपितसंसर्गता तदवच्छेदकत्वसम्बन्धेन रजतत्वादिनैवोक्तकार्यत्वस्य, स्वीया या इदन्त्वाद्यवच्छिन्नविशेष्यता तन्निरूपिता या विशेषणतासम्बन्धनिष्ठसंसर्गता तन्निरूपिता या अभावप्रकारता तन्निरूपिता सती रजतत्वाद्यवच्छिन्नप्रकारतानिरूपिता या प्रतियोगितानिष्ठसंसर्गता तन्निरूपिता या अवच्छिन्नत्वनिष्ठा संसर्गतावच्छेदकत्वरूपा विषयता तन्निरूपिता या संसर्गतावच्छेदकत्वरूपा विषयता तदवच्छेदकत्वसम्बन्धेन तत्पुरुषीयचाक्षुषादेर्योऽभावस्तत्त्वेन कारणत्वस्य च युक्तत्वात् शुक्तिगतेदन्त्वस्यैव निवेशात् रजतगतेदन्त्वादौ रजताद्युत्पत्तेर्नापत्तिः ।

किञ्च पुरुषापेक्षया धर्मितावच्छेदकानामानन्त्येपि यान् धर्मान् धर्मितावच्छेदकीकृत्य कदापि कस्यापि न बाधबुद्धिस्तदन्तर्भावेण(१) बाधाभावकारणत्वस्यैवानङ्गीकाराद्धर्मितावच्छेदकनिवेशपक्षे न गौरवम्, प्रत्युत तत्तत्पुरुषनिवेशपक्षे एव गौरवं सकलपुरुषाणामेवेह जन्मनि जन्मान्तरे वा बाधबुद्ध्यवतारस्यावश्यकत्वात् ।

---

(१) तदन्तर्भावेणेति । तत्र बाधस्य प्रतिबन्धकत्वाभावेन तदभावकारणत्वाङ्गीकारस्यानावश्यकत्वादिति भावः ।

न च प्रमेयवन्न रजतमित्यादिबाधबुद्ध्या धर्ममात्रस्यैव धर्मितावच्छेदकीकरणात्सर्वत्रैव धर्मितावच्छेदकतया बाधबुद्ध्यावतार आवश्यक इति वाच्यम् , उक्तबाधबुद्धिस्थले प्रमेयत्वावच्छिन्नावच्छेदकतानिरूपितविशेष्यतानिवेशेन हेतुहेतुमद्भावकल्पनेन सकलधर्मनिवेशाभावेन धर्मितावच्छेदकत्वनिवेशपक्षे गौरवाभावात् । तदनिवेश पक्षेऽपि एकधर्मावच्छिन्नतादृशावच्छेदकत्वसम्बन्धेन बाधबुद्धिसत्वेप्यन्यधर्मावच्छिन्नतादृशावच्छेदकत्वसम्बन्धेन विशिष्टबुद्ध्युदयान्निरवच्छिन्नतादृशावच्छेदकत्वसम्बन्धमादाय बाधबुद्धिसत्त्वेप्यन्यधर्मावच्छिन्नतादृशावच्छेदकत्वसम्बन्धेन इदं न रजतमित्यादावेको हेतुहेतुमद्भावः, अन्यस्तु तादृशावच्छेदकतावच्छेदकत्वादिसम्बन्धेन प्रमेयवन्न रजतमित्यादौ कल्पनीयस्तथा च निरवच्छिन्नतादृशावच्छेदकत्वमादाय हेतुतास्थले स्वल्पतरतत्तदिदन्त्वादिधर्मनिष्ठानवच्छिन्नावच्छेदकतानिरूपकविशेष्यतान्तर्भावेण हेतुत्वापेक्षया बहुतरतत्तत्पुरुषघटितरूपेण निरवच्छिन्नविशेष्यतावच्छेदकत्वसम्बन्धेन हेतुतायामेव गौरवाच्च ।

अपि च पित्तादिदोषोत्कर्षापकर्षयोः सतोः शङ्खादौ पीतिमाद्युत्कर्षापकर्षदर्शनात्पित्तादिजन्यमेव शङ्खपीतिमादिकं वाच्यम् , कार्योत्कर्षापकर्षयोः कारणोत्कर्षापकर्षाभ्यामेव दर्शनात् । पित्तादिस्थपीतिमादेरनुभूयमानस्यारोपोऽप्यत्यङ्गीकारे बाधकस्योक्तत्वात् पुरुषान्तरेणापि पित्तपीतिमादेर्ग्रहणापत्त्या पुरुषमात्रं प्रत्येव लाघवेन तस्यातीन्द्रियत्वकल्पनाच्च ।

## अनिर्वचनीयरजतस्य श्रौतत्वानिरूपणम् ।

किञ्च—सच्च त्यच्चाभवदित्यादिना(१) व्यावहारिकप्रपञ्चसृष्टिमुक्त्वा सत्यं चाऽनृतं च (२)सत्यमभवत् इति तैत्तिरीयकश्रुतौ व्यावहारिकसत्यपरसत्यशब्देन व्यावहारिकसृष्टिमनूद्यानृतशब्दितप्रातिभासिकरूपेण सत्यशब्दितपारमार्थिकसत्यस्य ब्रह्मणो भवनोक्तेर्व्यावहारिकरजतादिविलक्षणं प्रातिभासिकं रजतादिकं जायत इत्यवश्यं वाच्य-

---

( १ ) सच्च त्यच्चेति । 'तदनु प्रविश्य सच्च त्यच्चाभवत्' इत्यस्याः श्रुतेः तत्कारणं ब्रह्म सच्च मूर्तं च ( पृथिव्यप्तेजांसि ) त्यच्च अमूर्तं च वाय्वाकाशात्मकमभवत् इत्यर्थः, 'द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च मर्त्यं चामृतं च स्थितं च सच्च त्यच्च ; तदेतन्मूर्तं यदन्यद्वायोश्चान्तरिक्षाच्च तन्मर्त्यमेतत्स्थितमेतत्सत्' 'अथामूर्तंवायुश्चान्तरिक्षं चैतदमृतमेतद्यदेतत्त्यम्'] इति ( बृ० अ० १ ब्रा० २ ) श्रुतेः । तथा चानेन व्यावहारिकप्रपञ्चसृष्टिरुक्ता ।

( २ ) सत्यं चानृतं चेति । 'विज्ञानं चाविज्ञानं च सत्यं चानृतञ्च च सत्यमभवत् तत्सत्यमित्याचक्षते' इत्यत्र 'विज्ञानं चेतनम् अविज्ञानं तद्रहितमचेतनं पाषाणादि सत्यं च व्यावहारिकविषयमधिकारान्न परमार्थसत्यम् एकमेव हि परमार्थसत्यं ब्रह्म इह पुनर्व्यवहारविषयमापेक्षिकं सत्यं मृगतृष्णाद्यनृतापेक्षयोदकादि सत्यमुच्यते अनृतं च तद्विपरीतं किं पुनरेतत्सर्वमभवत् परमार्थसत्यं किं पुनस्तद् ब्रह्म सत्यं ज्ञानमनन्तमिति प्रकृतत्वात् यस्मात्सत्त्यदादिकं मूर्तामूर्तधर्मजातं यत्किंचेदं सर्वमविशिष्टं विकारजातमेकमेव सच्छब्दवाच्यं ब्रह्माभवत् तद्व्यतिरेकेण अभावान्नामरूपविकारस्य तस्माद् ब्रह्म सत्यमित्याचक्षते' इति शाङ्करभाष्यम् । अनेन परमार्थसतो ब्रह्मणो व्याव॰हारिकसद्भवनस्येव प्रातिभासिकानृतभवनस्योक्त्या तद्वदनृतस्यापि शुक्तिरजतादेरुत्पत्तिः स्फुटमवगम्यत इति भावः ।

म्(१) प्राणा वै सत्यमित्यादिश्रुतौ(२) व्यावहारिके सत्यपदप्रयोगाद्-व्यावहारिकपरसत्यपदसमभिव्याहृतानृतपदस्य व्यावहारिकविपरीतप्रातिभासिकार्थकत्वावश्यकत्वात् , अन्यथा(३) सत्यानृतवाक्यादेर्व्यावहारिकस्य सृष्टेः पूर्वमेव सत्त्वाभवदित्यादिनोक्तत्वात् शब्दात्मकवाक्यस्य भूतगुणत्वेन भूतात्मकत्वात् भूतसृष्ट्युक्त्यैव तत्सृष्ट्युक्तिसम्भवात् ,अन्यथा रूपादेरपि सृष्ट्युक्त्यापत्तेरेतद्वाक्यं व्यर्थमेव स्यात् । तस्माद् भ्रमस्थले रजतादिकं जायत इत्यवश्यं वाच्यम् ।

## अनिर्वचनीयरजतकल्पने गौरवपरिहरणम् ।

ननु शुक्त्यादौ रजतरङ्गादिनानाप्रकाराणां भ्रमस्थले बहूनामपूर्वरजतादिव्यक्तीनामुत्पत्तिकल्पने गौरवादन्यथाख्यातिरेव युक्तेति चेन्न, अन्यथाख्यातिमतेऽपि-एकस्मिन् धर्मिणि रजतादेर्युगपदुत्पन्नविनष्टानां बहूनां नानापुरुषीयाणां भ्रमाणां कल्पने गौरवात् ।

---

(१) वाच्यमिति । अत एव 'न तत्र रथा न रथयोगाः न पन्थानो भवन्ति अथ रथान् रथयोगान् पथः सृजते' इति श्रुतिः स्वप्ने प्रातिभासिकानां रथादीनां सृष्टिं ब्रूते ॥

( २ ) 'प्राणा वै सत्यम्' इत्यत्र सत्यशब्दो व्यावहारिकसत्यपरः ब्रह्मणोऽन्यस्य परमार्थसतः 'ततोऽन्यदार्तम्' इतिश्रुत्याऽनङ्गीकारात् तथा च 'एकमेव हि परमार्थसत्यं ब्रह्म इह पुनर्व्यवहारविषयमापेक्षिकं सत्यम् मृगतृष्णाद्यपेक्षया' इति शांकरभाष्यम् ।

( ३ ) 'सत्यं चानृतं च सत्यमभवत्' इत्यस्य सत्यवाक्यमनृतवाक्यं चाभवदित्येवार्थोऽस्तु तथा च नानेन प्रातिभासिकसृष्टिः प्रतिपादितेत्यत आह अन्यथेति ।

अस्मन्मते तत्रैकस्या एव रजतादिव्यक्तेस्तत्तत्पुरुषीयसाक्षितापन्नशुक्त्याद्यवच्छिन्नचैतन्यभास्यत्वोपपत्तेः ।

न च तत्तदन्तःकरणावच्छेदेन चैतन्यगततत्तदविद्यायाः परिणामस्य रजतादेरैक्यानुपपत्तिरिति वाच्यम्—एकस्या एवाविद्यायास्तत्तदन्तःकरणावच्छेदेन सम्भवात्, नानाविधाभिरप्येकशुक्त्यवच्छिन्नचिन्निष्ठाभिरेकरजतादिजननसम्भवात्तत्परिणामस्याप्यैक्यसम्भवात् ।

किञ्च—प्रथमप्रवृत्तोक्तयुक्तिभिर्भ्रमविषयस्योत्पत्त्यावश्यकत्वे व्यक्तिकल्पनारूपगौरवस्य चरमस्य फलमुखत्वेनादोषत्वमन्यथानुमितौ विशिष्टज्ञानत्वेन हेतुताकल्पने ज्ञानद्वयोत्तरं विशिष्टज्ञानव्यक्तीनां कल्पने परेषां(१) गौरवं स्यात् ।

एतेन रजतादेरुत्पत्त्यनन्तरं तस्य चाक्षुषाद्युत्पत्त्यभ्युपगमपक्षेऽविद्यावृत्तिकल्पनपक्षे चोभयोरुत्पत्तिकल्पने गौरवमित्यादिकं परास्तम् । अस्मदभ्युपगतरजताद्युत्पत्तिक्षण इव तदुत्तरक्षणेऽपि परै रजतादिचाक्षुषस्याभ्युपगमाच्च सामग्रीसत्त्वे कार्योत्पत्तेर्दुर्निवारत्वात् ।

---

(१) परेषामिति । अयं भावः मीमांसकाः व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य धूमवान् पर्वत इत्याकारस्य वह्निव्याप्यो धूम इति व्याप्तिज्ञानस्य चानुमितौ कारणत्वमभ्युपगच्छन्ति वह्निव्याप्यधूमवान् पर्वत इति ज्ञानस्य यत्र ज्ञानद्वयादेवानुमितिस्तत्र कल्पने गौरवात् तार्किकास्तु लाघवेन व्याप्तिप्रकारकपक्षधर्मताज्ञानस्यानुमितिकारणत्वं प्रकल्प्य यत्र ज्ञानद्वयादेवानुमितिस्तत्रापि विशिष्टज्ञानकल्पनारूपगौरवं फलमुखगौरवतया सहन्ते इति । परेषां—तार्किकाणाम् ।

## पुना रजतोत्पत्तिवारणम् ।

न च रजतादेरुत्पत्त्यनन्तरमपि पुनस्तस्योत्पत्त्यापत्तिरिति वाच्यम् , घटादिमति कपालादौ घटाद्यन्तरस्येव रजतादिमत्यज्ञाने रजताद्यन्तरस्योत्पत्त्यसम्भवात्(१) । यत्र रजतादिभ्रमोत्तररज्ज्वादिभ्रमोत्तरं पुना रजतादिभ्रमस्तत्र रज्ज्वादिभ्रमसामग्र्या एव पूर्वजातरजतादिभ्रमविनाशकत्वाङ्गीकारात् , अग्रिमरजतादिभ्रमस्याज्ञानान्तरोपादानकत्वाद्वानुपपत्त्यभावात् । विनश्यदवस्थानामेव दोषाणां शक्तिविशेषेण कारणतास्वीकारेण रजतादिसत्त्वे रजताद्यन्तरस्योत्पत्त्यनापत्तेश्च, परमते चाक्षुषादिधारायाः अनुभवसिद्धत्वेनात्र तथा वक्तुमशक्यत्वात् । पराभ्युपगतानुव्यवसायोत्पत्त्यादेरस्मदनभ्युपगतत्वस्य वक्ष्यमाणत्वेन परेषामेव महागौरवात् ।

एतेन(२) द्रव्यगुणकर्मणां तदुत्पत्तिप्रतिबन्धकत्वेपि सामान्यादिभ्रमस्थले पुनरपि सामान्याद्युत्पत्तिप्रसङ्गः, सामान्यादेरपि तदुत्पत्तिप्रतिबन्धकत्वकल्पने महागौरवमन्यथाख्यातिमते तस्याक्लृप्तत्वादित्यादिकं परास्तम् ।

वस्तुतस्तु सामग्रीमत्क्षणोत्तरक्षणत्वं कार्येण व्याप्यं न तु तदुत्पत्त्यापि ।

---

(१) उत्पत्त्यसंभवादिति । यथा घटवति कपाले घटान्तरस्योत्पत्तिवारणाय समवायेन घटं प्रति समवायेन घटस्य प्रतिबन्धकत्वमङ्गीक्रियते तथाऽनिर्वचनीयरजतं प्रति अनिर्वचनीयरजतस्य प्रतिबन्धकत्वमङ्गीकृत्य रजतादिमत्यज्ञाने न रजतान्तरस्योत्पत्तिरितिभावः ।

(२) एतेनेति । विनश्यदवस्थानामेव दोषाणां शक्तिविशेषण कारणतास्वीकारेणेत्यादिनोक्तेनेत्यर्थः ।

अथ वा कार्यतावच्छेदकसम्बन्धेन कार्यवद्देशावच्छेदेन कार्याधिकरणीभूतो यस्तदन्यो यः सामग्रीमान् क्षणस्तदुत्तरक्षणत्वमेव कार्योत्पत्तिव्याप्यं विनश्यदवस्थकार्यतावच्छेदकावच्छिन्नाधिकरणस्य सामग्रीक्षणस्योत्तरक्षणे कार्यतावच्छेदकावच्छिन्नस्योत्पत्त्यनभ्युपगमेपि न क्षतिः कार्यनाशोत्पत्तिद्वितीयादिक्षण एव कार्योत्पत्तिसम्भवात् , धारावाहिकज्ञानस्थले द्विक्षणमात्रव्यवधानस्वीकारादन्यथोक्तप्रतिबन्धकत्वादिकल्पने गौरवात्। एवञ्च रजतादेरिव तच्चाक्षुषस्य तज्जातीयसत्त्वे पुनरुत्पत्त्यनभ्युपगमेन परेषां गौरवाभावेऽनिर्वचनीयवादे युक्तीनामुक्तत्वाद्दृश्यमाणत्वाच्च रजताद्यपूर्वव्यक्तिकल्पनागौरवमकिञ्चित्करमिति ध्येयम् ।

किञ्चानावृतचैतन्यतादात्म्यादेवापरोक्षत्वसम्भवेन लौकिकविषतायामेव मानाभावात् तस्यास्त्वयोक्तं दोषनियम्यत्वं वन्ध्यापुत्रोत्सवायमानम् ।

न च प्रत्यक्षमनोवृत्तिविषयत्वस्य पूर्वोक्तरीत्या लौकिकालौकिकत्वभेदाभावेपि तन्मात्रस्यैवापरोक्षतारूपत्वसम्भवे अनावृत्तचैतन्यतादात्म्यस्य तत्कल्पनमप्यसिद्धमिति वाच्यम् , वृत्तिं विनापि (१)वृत्तिसु-

---

(१) वृत्तिं विनापीति । इदमत्राकूतम् अन्तः करणवच्छिन्नो जीवः, सर्वगतोऽसङ्गोऽविद्याप्रतिबिम्बो जीवः, इति पक्षद्वयेऽपि प्रमातृचैतन्योपरागार्था विषयगतचैतन्यावरणभङ्गार्था चान्तःकरणवृत्तिः । अविद्यावच्छिन्नः सर्वगतो जीव आवृतः इति पक्षे जीवस्यैव जगदुपादानत्वेन सर्वसम्बद्धत्वात् आवरणभङ्गार्था वृत्तिः नोपरागार्था आवरणनिवृत्त्या स्वतः सम्बद्धजीवेनैव भानोपपत्तेरुपरागार्थवृत्तेरनावश्यकत्वात् । आद्यपक्षद्वये जीवान्यचित एव जगदुपादानतया जी-

खादावनावृतचैतन्यसम्बन्धेनैवापरोक्षताव्यवहारात्, तेनैव सर्वत्र तद्व्यहारसम्भवे वृत्तिविषयत्वस्य तद्रूपत्वाकल्पनात्।

अथ वृत्तिज्ञानसुखादावपि वृत्तिज्ञानस्योत्पत्तिः कल्प्यत इति चेत् अतितरामन्धोऽसि—यतः श्रुतियुक्तिभिरात्मनः स्वप्रकाशानुभवरूपत्वे सिद्धे तेनैवानावृतचिद्रूपेण सकलदृश्यानुस्यूतेनैकेन वृत्तिज्ञान

---

वस्य घटादितादात्म्याभावेन उपादानस्य ब्रह्मण एव विषयेण सह साक्षाद्भासकत्वं सम्भवति न जीवस्येति घटमहं जानामीति जीवव्यवहाराय वृत्तिघटितसम्बन्ध आवश्यक इति प्रमातृचैतन्यस्य (जीवस्य) विषयेण सह सम्बन्धस्तदर्था तत्फलिका वृत्तिरावश्यिका आवृत्तिफलत्वं च प्रत्यक्षस्थले प्रतिविम्बाश्रयप्रमावच्छेदकत्वरूपस्य परोक्षस्थले प्रतिबिम्बाश्रयप्रमाविषयत्वरूपस्य उपरागस्य वृत्तिं विनाऽभावेन वृत्तिनिर्वाह्यतया बोध्यम्।

ननु वृत्तेश्चिदुपरागार्थत्वे अधिष्ठानब्रह्मणा साक्षादेव जीवस्य सम्बन्धसम्भवात् ब्रह्माकारा वृत्तिर्व्यर्थेति चेन्न विषयसंसृष्टं यत्प्रमातृचैतन्यं प्रत्यावरणं तद्भङ्गार्थं वृत्तेरावश्यकत्वात्, सर्वत्र ब्रह्मसाधारणविषयनिष्ठाज्ञानावरणाभावप्रयोजकतयाऽप्यन्तःकरणवृत्तिरिति यावत्। एवं च वृत्तिसुखादिषु जीवस्य तादात्म्यसम्बन्ध एव साक्षात्कारव्यवहारे नियामकः इति वृत्तेर्नावश्यकत्वमिति तेषां साक्षिभास्यत्वम्।

वेदान्तपरिभाषायां तु तत्तदाकारवृत्त्युपहितप्रमातृचैतन्याभिन्नत्वं घटादेर्विषयस्य प्रत्यक्षत्वप्रयोजकमित्युक्त्वा 'नन्वेवं वृत्तावतिव्याप्तिः, अनवस्थाभिया वृत्तिगोचरवृत्त्यनङ्गीकारेण तत्र स्वाकारवृत्त्युपहितत्वघटितोक्तलक्षणाभावादिति चेन्न अनवस्थाभिया वृत्तेर्वृत्त्यन्तराविषयकत्वेऽपि स्वविषयत्वाभ्युपगमेन स्वविषयवृत्त्युपहितप्रमातृचैतन्याभिन्नसत्ताकत्वस्य तत्रापि भावात् एवं चान्तःकरणतद्धर्मादीनां केवलसाक्षिविषयकत्वेऽपि तत्तदाकारवृत्त्यभ्युपगमेन उक्तलक्षणस्य तत्रा-

सुखादिषु साक्षात्करोमीत्यादिव्यवहारसम्भवे तेषूत्पत्तिविनाशशाल्यसंख्यवृत्तितत्सामग्र्यादि कल्पयसि(१) ।

## आत्मनोऽनुभवरूपत्वे श्रुतिसंग्रहः ।

श्रुतयस्तावत्–अयमात्मा ब्रह्म सर्वानुभूः, अत्रायं पुरुषः स्वयं

---

पि सत्त्वान्नातिव्याप्तिः, न चान्तःकरणतद्धर्मादीनां वृत्तिविषयत्वाभ्युपगमेन केवलसाक्षिविषयत्वाभ्युपगमविरोध इति वाच्यम् , न हि वृत्तिं विना साक्षिविषयत्वं केवलसाक्षिवेद्यत्वं किन्त्विन्द्रियानुमानादिप्रमाणव्यापारमन्तेण साक्षिविषयत्वम् अत एव च प्रतिभासिकरजतस्थले रजताकाराविद्यावृत्तिः साम्प्रदायिकैरङ्गीकृता, इत्युक्तम् ।

( १ ) कल्पयसीति । प्रतिबिम्बाश्रयमनस्तादात्म्यादिसम्बन्धेन सुखादिसम्बद्धजीवस्य प्रतिबिम्बाश्रयमनस्तादात्म्येन सुखादीनां च वृत्तिं विनापि 'सुखं साक्षात्करोमि' इत्यादौ विषयत्वम् एवं शुक्तिरूप्यादावपि इदमाकारवृत्तिनिर्गमनेन तादृशमनोऽवच्छिन्नचित्तादात्म्यमेव भासकतानियामकः सम्बन्धोऽस्तीति तत्राविद्यावृत्तिस्वीकारो वृथा ।

न चैवं धर्माधर्मादावपि प्रतिबिम्बाश्रयमनस्तादात्म्येन तत्सम्बद्धजीवेन साक्षात्कारः स्यादिति वाच्यम् । न यथाकथञ्चित्सम्बन्धमात्रं पदार्थभानप्रयोजकं किन्तु स्वप्रतिबिम्बाश्रयप्रमावच्छेदकत्वमेव तथा च स्वप्रतिबिम्बाश्रयावच्छेदकत्वसम्बन्धेन सुखादिसम्बन्धो जीवे इति तत्साक्षात्कारः धर्माधर्मादौ तु प्रतिबिम्बाभावात् जीवस्य तत्तदाकारत्वाभावेन प्रतिबिम्बाभावात् न जीवस्य तत्सम्बन्धेन धर्मादिसम्बद्धतेत्यदोषात् ।

ननु धर्मादौ जीवस्य तदाकारत्वाभावे किं प्रयोजकमिति चेदुच्यते धर्मादेः स्वभावविशेषकृतायोग्यत्वं फलसंस्काररूपाणां सूक्ष्मत्वेन जीवाज्ञानविषयत्वं वेति बोध्यम् ।

ज्योतिर्भवति, येनेदं सर्वं विजानाति तं केन विजानीयात् , यत्साक्षाद-परोक्षाद् ब्रह्म, य आत्मा सर्वान्तरः स आत्मा, येन वा पश्यति येन वा शृणोति येन वा गन्धाञ् जिघ्रति येन वा वाचं व्याकरोति येन वा स्वादु चास्वादु च विजानाति, यन्मनसा न मनुते येनाहुर्मनो मतम् , स्वप्रकाशमहानन्दमात्मैवैतत्, सर्वस्य द्रष्टा सर्वस्य साक्षी, साक्षी चेता केवलो निर्गुणश्च, तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति, न दृष्टेर्द्रष्टारं पश्येः, अदृष्टो द्रष्टा नान्योऽतोऽस्ति द्रष्टा, इत्याद्याः ।

## आत्मनोऽनुभवरूपत्वे युक्तिसंग्रहः ।

युक्तयश्च—आत्मनोनुभवान्यत्वे दृश्यत्वापत्त्या विनाशित्वमिथ्या-त्वाद्यापत्तिः क्लृप्तनित्यापरिच्छिन्नात्मस्वरूपत्वे सम्भवत्यात्मधर्मतया-ऽनन्तकोटयनुभवव्यक्तिकल्पने गौरवम् , आत्मनः प्रकाशान्तरा-भ्युपगमे तस्यापि प्रकाशान्तरमभ्युपेयम् अन्यथा प्रकाशासम्बद्धस्य तस्य शशविषाणायमानत्वादसिद्ध्यापत्तिः, प्रमेयत्वादिना (१)का-लान्तरीयानुभवादिविषयत्वेपि तत्तद्विषयत्वेन तत्तद्विषयभि-न्नत्वेन च तदसिद्धितादवस्थ्यम् , सर्वं ज्ञानं स्वविषयभिन्नमित्याद्य-नुमानस्य सम्भवेपि तेनात्मान्यानुभवासिद्धिः आत्मान्यानुभव-

(१) प्रमेयत्वादिनेति । इदं वस्तु वाच्यं प्रमेयत्वादित्याद्य-नुमानसम्भवेऽपि प्रकाशस्योत्तरप्रकाशविषयत्वेन प्रकाशस्य प्रकाश-विषयभिन्नत्वेन न सिद्धिरिति भावः ।

पक्षत्वे चाश्रयासिद्ध्यापत्तिः(१) । तत्कालीनमत्यन्तप्रकाशान्तरा-भ्युपगमेऽग्रेपि तथैव प्रकाशान्तराणि वाच्यानीत्यनवस्था निरवधिप्रकाशधारायां नित्यत्वाभ्युपगमेऽननुभवपराहतिश्च जन्यत्वाभ्युपगमे संशयविपर्यासापत्तिश्च यत्क्षणे आत्मनिश्चयो न जातस्तदुत्तरक्षणे देहान्तःकरणाविद्यादावात्मनः संशयाद्यापत्तिसंभवात्, न हि तत्संशयादिकं कस्य चिदानुभविकम् । तदुक्तं टीकादौ—न हि जातु कश्चित् संदिग्धे अहमनहं वेति न वा विपर्यस्यति नाहमेवेति ।

नचोक्तसंशयादिकं देहादावात्मत्वविशिष्टस्य वाच्यं तस्य च न(स्व)प्रकाशत्वं सिद्धान्तेऽपीति वाच्यम्, स्फुरणमात्ररूपस्य शुद्धात्मन एवोक्तसंशयादिविषयत्वेनापादनात् देहादि स्फुरति न वा न स्फुरतीति वेत्यस्य अयं घटो नवेत्यादि शुद्धघटत्वादिसंशयादिवत् सम्भवात् ।

अथ स्फुरणस्याज्ञानानावृतचिद्रूपस्यैव देहादौ सत्त्वेन ( उक्तसंशयहेतुत्वेन दोषाणामक्लृप्तत्वेन च ) देहादिस्फुरणावरकाज्ञानकार्यस्योक्तसंशयादेर्नोत्पत्तिसम्भवः, अत एव—पुरुषान्तरीयदेहादौ घटादौ च चैतन्यस्याज्ञानावृत्तत्वेन तत्र तादृशसंशयादिर्जायत एवेति चेत्, तर्हि स्फुरणे ज्ञानान्तराङ्गीकारो व्यर्थ एव,

---

( १ ) आश्रयासिद्ध्यापत्तिरिति । अनुभवे आत्मभेदरूपपक्षतावच्छेदकस्याभावेन पक्षतावच्छेदकाभाववत्पक्षरूपाश्रयासिद्धिरित्यर्थः । इयं सम्विद्, आत्मा भवितुमर्हति नित्यत्वे सति स्वप्रकाशत्वाद्यन्नैवं तन्नैवं यथा घट इत्यनुमानेन आत्मनोऽनुभवरूपत्वं बोध्यम् ।

आवरणनिवृत्त्यर्थमेव ज्ञानोत्पत्त्यभ्युपगमात् ।

अथ व्यवहारा(द्य)र्थं स्फुरणे ज्ञानान्तरमावश्यकमिति चेत्–स्फुरणतादात्म्येनैव अन्यस्येव स्फुरणस्यापि व्यवहारादिसम्भवात् । व्यहारादिमात्रं प्रति स्फुरणतादात्म्यस्यैव प्रयोजकत्वात् तस्मात्स्फुरणस्य व्यवहारादिकं संशयविपर्यासाविषयत्वञ्च स्वातिरिक्तानपेक्षमिति स्वतः सिद्धत्वमित्याद्याः—आत्मनः स्वप्रकाशानुभवरूपत्वं व्यवस्थापयन्ति ।

## वृत्तिं विना 'शुक्तिं साक्षात्करोमि' इति प्रतीतिवारणम् ।

ननु स्फुरणतादात्म्यस्यैवापरोक्षतारूपत्वे चाक्षुषादिवृत्त्यनुत्पत्तिदशायामपि शुक्तित्वादौ साक्षात्करोमीति व्यवहारादिः स्यात्–न च जीवचैतन्येन शुक्तित्वादेराध्यासिकतादात्म्याभवात्तदा न तथा व्यहारादिकं चाक्षुषादिवृत्त्युत्पादे तु शुक्तित्वाद्यवच्छिन्नचैतन्येन निर्गतान्तःकरणपरिणामचाक्षुषाद्यवच्छिन्नस्य जीवचैतन्यस्यैक्यात्तद्युज्यत इति वाच्यम् , अविद्योपहितचैतन्यस्यैव जीवत्वे तस्यैव च सर्वकार्योपादानत्वे चाक्षुषादिवृत्त्यवच्छेदं विनाप्यन्तःकरणादिभिरिव शुक्तित्वादिविषयमात्रेणाध्यासिकतादात्म्यस्य सहजत्वादिति चेद्–

न अविद्योपहितचैतन्यस्य जीवत्वजन्यमात्रोपादानत्वपक्षेपि सुखादाविव शुक्तित्वादौ चाक्षुषाद्यनुत्पत्तिकाले साक्षात्करोमीतिव्यवहाराद्यदर्शनादेवावरकाज्ञानकल्पनादनावृतचैतन्यतादात्म्यस्यापरो-

न्ततारूपत्वे बाधकाभावात्(१) ।

## वृत्तेरुपयोगनिरूपणम् ।

यदि त्वन्तःकरणोपहितचैतन्यमेव जीवः अविद्योपहितचैतन्यस्यैव वा जीवत्वेऽपि न तस्य सकलकार्योपादानत्वं किन्तु ब्रह्मणस्तदा जीवचैतन्यस्य शुक्तित्वादिबहिर्विषयैराध्यासिकतादात्म्यसम्बन्धस्यैवाभावात् चाक्षुषाद्यभावकाले न तथा व्यहारादिकम् ।

न च शुक्तित्वाद्याकारकचाक्षुषादिवृत्त्यनुत्पादेपीदंत्वाद्याकारकचाक्षुषादिकाले शुक्तित्वाद्यवच्छिन्नचैतन्येन जीवचैतन्यस्यैक्यसम्भवात् शुक्तित्वादौ साक्षात्करोमीतिव्यवहारादि स्यादिति वाच्यम्, अन्तःकरणावच्छेदतदभावकृतभेदनिवृत्तिरूपस्यैक्यस्य संभवेऽपि शुक्तित्वाद्याकारकवृत्तिं विना तदवच्छेदेन तदधिष्ठानब्रह्मचैतन्यावरकाज्ञानसत्त्वात् शुक्तित्वमिह नास्ति न भाति शुक्तित्वेनेदं न(२) जानामीति व्यवहारात्, अनावृतचैतन्यसंबन्धस्यैव साक्षा-

---

(१) बाधकाभावादिति । अयमत्र निष्कर्षः—यत्र चैतन्यस्य तदाकारत्वं तत्रापरोक्षत्वव्यवहारः चैतन्यस्य तदाकारत्वाभावश्च स्वच्छेऽपि ब्रह्मचैतन्येऽपि आवरणात् अनावृतेऽपि शुक्तिरजतादावस्वच्छत्वात् धर्माधर्मादौ तु अस्वच्छत्वादावृतत्वाद्वा तेनस्वच्छेऽप्यावृते प्रमाणवृत्त्या तदाकारता अनावृतेऽप्यस्वच्छे शुक्तिरजतादौ अविद्यावृत्त्या तदाकारता अनावृत्ते स्वच्छे तु सुखादौ स्वत इति अस्वच्छस्य वृत्तिं विना न भानप्रसङ्गः ।

(२) न जानामीतिव्यवहारादिति । अत्रेदं बोध्यम् शुक्तौ 'इदं रजतम्' इति भ्रमे अधिष्ठानांशेऽन्तःकरणवृत्तिः अध्यस्तांशे चावि-

त्करोमीत्यभिलापप्रवृत्त्यादिकार्यप्रयोजकत्वादावृतचैतन्यसंबन्धस्य पराभ्युपगतनिर्विकल्पकस्थानीयत्वात् ।

न च चाक्षुषादेः शुक्तित्वादावुत्पादेपि तदधिष्ठानब्रह्मचैतन्यं मूलाज्ञानेन तत्त्वसाक्षात्कारात्पूर्वमावृतमेवेति कथं शुक्तित्वाद्यपरोक्षतेति वाच्यम्, अज्ञानविषयत्वाख्यावरणानवच्छेदकत्वरूपानावृतत्वस्य चित्सम्बन्धे विशेषणत्वात्, शुक्तित्वादौ चाक्षुषादिकाले शुक्तित्वादितदधिष्ठानचितोः संबन्धस्यावरणानवच्छेदकत्वात्, तस्माज्जन्यमात्रे (१)जीवस्योपादानत्वे शुक्तित्वादिभिर्जीवस्याध्यासिकोपरागसत्त्वेप्यावरणाभिभवार्थं (२)ब्रह्मण उपादानत्वे तु-

द्यावृत्तिः तस्यां च तादात्म्यस्य भानम्। नन्वेवं वृत्तिभेदेन ज्ञानैक्यानुभवविरोध इति चेन्न विषययोरभेदाध्यासे ज्ञानयोरप्यभेदाध्यास इत्यनुभवविरोधाभावादिति ।

( १ ) जीवस्योपादानत्व इति । इदमत्राकूतम्–अज्ञानोपहितं बिम्बचैतन्यमीश्वरः, अज्ञानप्रतिबिम्बचैतन्यं जीवः, इति अज्ञानानुपहितं शुद्धचैतन्यमीश्वरः, अज्ञानोपहितं जीव, इति वा मुख्यो वेदान्तसिद्धान्तः एकजीववादाख्यः । अयमेव दृष्टिरेव जगतः सृष्टिः न त्वीशसृष्टस्य प्रमाणादिना जीवस्य दृष्टिरित्येवं रूपो दृष्टिसृष्टिवादः । अस्मिन्पक्षे जीव एव स्वाज्ञानवशात् जगदुपादानं निमित्तं च दृश्यं सर्वं प्रातीतिकम् देहभेदाच्च जीवभेदभ्रमः इति तथाच "पुरत्रये क्रीडति यस्तु जीवस्ततस्तु जातं सकलं विचित्रम्' इति श्रुतिः ।

( २ ) आवरणाभिभवार्थमिति । जीवस्यैव जगदुपादानत्वे तस्यैव घटादिसर्वविषयसम्बद्धत्वात् नोपरागार्थवृत्तेरावश्यकत्वं किन्तु आवरणभङ्गार्थवृत्तेरेव तस्यां सत्यामावरणनिवृत्तौ स्वतः सम्बद्धजीवेनैव भानोपपत्तेरिति भावः ।

क्तोपरागार्थमावरणाभिभवार्थश्च(१) चाक्षुषादिवृत्तिरिति तदभाव-

---

( १ ) ब्रह्मण उपादानत्व इति । अस्मिन् पक्षे जीवेन सह घटादितादात्म्याभावादुपादानस्य ब्रह्मण एव विषयेण सह साक्षाद्भासकत्वं सम्भवति न जीवस्येति घटमहं जानामीति जीवव्यवहाराय वृत्तिघटितसम्बन्ध आवश्यक इति प्रमातृचैतन्यस्य जीवस्य विषयेण सम्बन्धार्था आवरणभङ्गार्था च वृत्तिरावश्यिकेति भावः ।

अयमभिप्रायः—अविद्या नास्ति न भातीतिव्यवहाररूपावारणशक्तिमती आकाशादिकार्यरूपविक्षेपशक्तिमती च सर्वगतं चिदात्मानमावृणोति अङ्गुलिरिव नयनसहिता सूर्यमण्डलम् शुक्त्यंशस्येव परिपूर्णानन्दरूपाश्रयविशेषस्यभानं विना कार्यासम्भवः अधिष्ठानभाने भ्रमानुपपत्तेः, ततः पूर्वपूर्वसंस्कारजीवकर्मप्रयुक्ता सती निखिलजगदाकारेण परिणमते, सा च स्वगतचिदाभासद्वारा चित्तादात्म्यापन्नेति तत्कार्यमपि सर्वमाभासद्वारा चिदनुस्यूतमेव, एवं च चैतन्यस्य दीपस्येव स्वसम्बद्धसर्वभासकत्वाज्जगदुपादानचैतन्यं प्रमाणापेक्षामन्तरेणैव सर्वदा सर्वं भासयत् सर्वज्ञं भवति ते न तत्र न मानमेयादिव्यवस्था किन्तु जीवे एव तस्यान्तः करणावच्छिन्नतया सर्वासम्बद्धत्वादिति चिदभिव्यक्तियोग्येन येनान्तः करणेन यदा सम्बद्धं तदेव तदा तदवच्छिन्नो जीवोऽनुभवति ।

इयमत्र प्रक्रिया—शरीरमध्ये स्थितः सर्वशरीरव्यापकोऽन्तः करणोऽविद्याविवर्तः सत्त्वप्रधानपञ्चभूतारब्धतयातिस्वच्छः नेत्रादिद्वारा निर्गत्य योग्यान् घटादिविषयान्व्याप्य तदाकारो भवति तस्य च सौरालोकवद् झटित्येव सङ्कोचविकासावुपपद्येते । स च सावयवत्वात् परिणाममानो देहाभ्यन्तरे घटादौ च सम्यग्व्याप्य देहघटयोर्मध्येऽपि चक्षुर्वदविच्छिन्नोऽप्यवतिष्ठते । तत्र—देहेऽन्तःकरणभागोऽहंकाराख्यः कर्ता, देहविषयमध्यवृत्तिदण्डायमानस्तद्भागो वृत्तिज्ञानाख्यः क्रिया, विषयव्यापकस्तद्भागो विषयस्य ज्ञानकर्मत्वसम्पादकमभिव्यक्तियोग्य-

काले शुक्तित्वादौ न साक्षात्करोमीत्यभिलापप्रवृत्त्याद्यापत्तिः ।

## अभिभवस्वरूपनिरूपणम् ।

वृत्तिज्ञानस्यावरकाज्ञानं प्रति अभिभावकत्वन्तु—तन्नाशजनकत्वं परेषां कार्यस्य ( प्रतियोगिनः ) स्वप्रागभावनिवृत्तिजनकत्वपक्षवत् , तन्नाशरूपत्वं वा परेषां कार्यस्य (प्रतियोगिनः) स्वप्रागभावनिवृत्ति-रूपत्ववत् , प्रतियोगिध्वंससमये प्रागभावध्वंसानुवृत्तिवत् वृत्तिज्ञान-ध्वंससमयेप्यज्ञानध्वंसानुवृत्तिसम्भवात् ।

एतेनाज्ञानवृत्तिज्ञानयोः समानाकारतामात्रेण नाश्यनाशकभा-वाङ्गीकारे स्पार्शनशुक्तित्वादिप्रत्यक्षेण चाक्षुषरजतादिभ्रमहेत्वज्ञा-नस्य निवृत्तिः स्यात् । दृश्यते हि तेन तदनिवृत्तिः चाक्षुषत्वादिना चाक्षुषादिभ्रमहेत्वज्ञानत्वेन तदङ्गीकारे तु गौरवम् अज्ञानवृत्तिज्ञानयोः नाश्यनाशकभावं कल्पयित्वा अनावृतचैतन्यसम्बन्धस्य सकलाप-रोक्षतात्वकल्पनापेक्षया बहिरर्थे चाक्षुषादिवृत्तेरान्तरार्थे चानावृतचै-तन्यस्यापरोक्षतात्वमित्येव कल्पनं युक्तमित्यादि कुचोद्यमपास्तम् ।

परेषां (१)ज्ञानतत्प्रागभावयोरिवास्माकमज्ञानवृत्तिज्ञानयोर्ना-

---

त्वमित्युच्यते । तस्य च त्रिभागस्यान्तः करणस्यातिस्वच्छतया चैतन्यं तत्राभिव्यज्यते तस्य चाभिव्यक्तस्य चैतन्यस्यैकत्वेऽपि अभिव्यञ्ज-कान्तः करणभेदात् त्रिधा व्यपदेशो भवति—कर्तृभागावच्छिन्नचिदंशः प्रमाता, क्रियाभागावच्छिन्नचिदंशः प्रमाणम् , विषयगतोऽभिव्यक्ति-योग्यत्वभागावच्छिन्नचिदंशो मितिः, प्रमेयं तु विषयगतं ब्रह्मचैतन्य-मेव तदेव च ज्ञातं सत् फलमिति ।

( १ ) परेषां—तार्किकाणाम् । तैर्ज्ञानं ज्ञानप्रागभावनाशकं यथा

श्यनाशकभावाङ्गीकारात् यादृशवृत्तिज्ञानेन यादृशाज्ञानस्य वस्तुतो नाशस्तत्प्रागभावत्वं तत्रैवाङ्गीकृत्य स्वप्रागभावत्व कालिक(१)सम्बन्धावच्छिन्नाधेयत्वश्चेत्युभयसम्बन्धेन प्रमात्वेन कारणता अज्ञानवृत्तिप्रतियोगितासम्बन्धेन नाशत्वेन कार्यतेत्यङ्गीकारसम्भवात् । प्रमात्वञ्च जातिविशेषः प्रमिणोमीत्याद्यनुभवसिद्धः ।

न चाज्ञानस्य प्रागभावरूपत्वे भावाभावविलक्षणचैतन्यविषयकत्वादिसिद्धान्तव्याघात इति वाच्यं परेषां ज्ञानस्य भावस्यापि स्वध्वंसप्रागभावत्वसविषयकत्वादिवद्भावाभावविलक्षणसविषयकत्वादिसत्त्वेपि प्रागभावत्वाविरोधात् । प्रागभावान्तरस्याप्रामाणिकत्वेप्यज्ञानस्य तत्र प्रागभावत्वस्य चोक्तवक्ष्यमाणतर्कसहकृतप्रमाणगम्यत्वेनावश्यकत्वाच्च ।

## एकाज्ञानपक्षे एकाज्ञाननिवृत्तौ मोक्षापत्तिनिरासः ।

ननु यद्यज्ञानमेकमेव न तु मूलाज्ञानादखण्डानन्दावारकादन्यानि घटाद्यवच्छिन्नान्यज्ञानानि घटादिप्रमानिवर्त्यानि इत्युपेयते तदा घटाद्याकारकप्रमयैवाज्ञाननिवृत्तिरूपो मोक्षः (२)स्यादिति चेदु-

---

भ्युपगम्यते तथा मया वृत्तिज्ञानमज्ञाननाशकमभ्युपगम्यते इत्यर्थः ।

( १ ) कालिकेति । एतत्कालीनप्रमायाः पूर्वं नष्टेऽज्ञानेऽपि नाशापत्तिः तत्रापि एतत्कालीनप्रमाप्रागभावत्वस्य सत्त्वादतः कालिकसम्बन्धावच्छिन्नत्वमित्युक्तम् कालिकसम्बन्धावच्छिन्नाधेयत्वस्य प्रमाकालीनाज्ञाने एव सत्त्वमित्यदोषः ।

( २ ) मोक्षः स्यादिति । इदमेकाज्ञानपक्षे इव नानाऽज्ञानपक्षेऽपि दूषणम् एकस्य जीवस्यैकाज्ञानोपाधिकत्वात् ।

न एकाज्ञानपक्षे (१)प्रमाविरहविशिष्टं यदज्ञानविषयतावच्छेदकत्वं तदभावविशिष्टस्यैव चैतन्यसम्बन्धस्यापरोक्षतारूपत्वात् प्रमाया अविद्याभिभावकत्वमुच्यते, तादृशाभाववैशिष्ट्यञ्च सुखादिचितोः सम्बन्धे सहजाद(२)ज्ञानविषयतावच्छेदकत्वात् घटादिचितोः सम्बन्धे तु तन्निष्ठाज्ञानविषयतावच्छेदकत्वे वृत्तिविशिष्टत्वात् ।

न च चाक्षुषादिप्रमाविरहाद्यनुपस्थितावपि सुखादौ साक्षात्क-

(१) एकाज्ञानपक्ष इति । उत्तेजकेन मणेरिव वृत्त्या प्रमाणजन्यान्तः करणवृत्त्यभावसहकृतस्य अज्ञानस्य सति भात्यपि वस्तुनि नास्ति न भातीति प्रतीतिजननसमर्थस्यावरणपदाभिधेयस्याभिभवः क्रियते इत्यङ्गीकारेण वृत्तौ सत्यां विद्यमानमपि स्वकार्यासमर्थमविद्यमानसममेवाज्ञानमभिभूतमित्युच्यते इत्यदोष इति भावः ।

(२) सहजादिति । स्वत इत्यर्थः । वृत्तिं विनेति यावत् । अयमभिसन्धिः—न यथाकथञ्चित्सम्बन्धमात्रं पदार्थभानप्रयोजकम् किन्तु स्वप्रतिबिम्बाश्रयप्रमावच्छेदकत्वमेव, तथाच घटाद्यवच्छिन्नान्तः करणवृत्तौ चैतन्यस्य प्रतिबिम्बेन प्रतिबिम्बाश्रयवृत्त्यवच्छेदकत्वेन घटादौ, सुखाद्यवच्छेदेन ब्रह्मचैतन्ये प्रतिबिम्बात् प्रतिबिम्बाश्रयब्रह्मचिदवच्छेदेन सुखादौ, ब्रह्मचैतन्यावच्छेदेन ब्रह्माकारकवृत्तौ प्रतिबिम्बाश्रयवृत्त्यवच्छेदकत्वेन ब्रह्मणि, प्रातिभासिकरजताद्यवच्छेदेन रजताकारायामविद्यावृत्तौ प्रतिबिम्बात्प्रतिबिम्बाश्रयवृत्त्यवच्छेदकत्वेन सम्बन्धेन प्रातिभासिके, सबद्धत्वाज्जीवस्य घटसुखब्रह्मरजतादिभानम् न तु धर्मादेः तत्रधर्मं साक्षात्कारोमीति प्रत्ययादर्शनेन धर्मावच्छेदेन धर्मानुस्यूतचैतन्ये प्रतिबिम्बाकल्पनात् कल्पनायाः फलानुसारित्वादित्यलम् ।

रोमीत्यादिव्यवहारात् कथमुक्तरूपा सर्वत्रापरोक्षतेति वाच्यम् , उक्तावच्छेदकतासम्बन्धेना(१)ज्ञानाभावस्यैव निवेशात्सम्बन्धानुपस्थितावपि क्षतिविरहात् , प्रमाविरहवैशिष्टयन्तु स्वसमानाधिकरण स्वविषयतावन्निरूपितत्वसम्बन्धेन स्वावच्छेदकत्वसम्बन्धेन(वा) चावच्छिन्नप्रतियोगिताकप्रमाविरहस्य सामानाधिकरण्यरूपम् ,

घटादिचाक्षुषादिप्रमाकाले तु तस्या निर्गमेन स्वसमानाधिकरणस्वाकाराख्यसम्बन्धविशेषरूपविषयत्वस्य घटादौ स्वीकारात् , घटादिचित्सम्बन्धावच्छेदेन अज्ञानविषयत्वस्येव प्रमाया अपि चिदाश्रितत्वाङ्गीकाराच्च घटादिचित्सम्बन्धनिष्ठमज्ञानविषयतावच्छेदकत्वं . नोक्तसमानाधिकरण्यवत् ।

---

( १ ) उक्तावच्छेदकतासम्बन्धेनेति । प्रमाविरहविशिष्टं यदवच्छेदकत्वं तेन संबन्धेनेत्यर्थः । सामानाधिकरण्यरूपमिति । यदा घटादिचाक्षुषप्रमा तदा इन्द्रियद्वारा वृत्तिनिर्गमनेन प्रमासमानाधिकरणप्रमाविषयतावन्निरूपितत्वसंबन्धेन प्रमावच्छेदकत्वसम्बन्धेन च प्रमाया एव घटादिचित्संबन्धे सत्त्वेन प्रमाविरहस्य तत्रासत्त्वेन प्रमाविरहविशिष्टमज्ञानविषयतावच्छेदकत्वं समानाधिकरण्यसंबन्धेन न जातमिति प्रमाविरहविशिष्टं यदज्ञानविषयतावच्छेदकत्वं तत्संबन्धावच्छिन्नप्रतियोगिताकाज्ञानाभावस्य तत्र सत्त्वेन अज्ञानाभावविशिष्टचित्तादात्म्यरूपाऽपरोक्षता सिध्यतीति अक्षरार्थः । एवं च चाक्षुषादिप्रमाविरहानुपस्थितावपि सुखं साक्षात्करोमीति प्रत्यये न किंचिद्बाधकम् तेन रूपेणोपस्थितेः संसर्गांशेऽनपेक्षणात् प्रकारतां प्रत्येवोपस्थितेः प्रयोजकत्वात् संसर्गांशे च विशेषणताख्यविषयता स्वीक्रियते न प्रकारताख्येति भावः ।

## अपरोक्षतानिकृष्टलक्षणम् ।

प्रमावच्छेदकत्वासमानाधिकरणं यत्स्वविषयतावच्छेदकत्वं तेन सम्बन्धेनाज्ञानस्य योऽत्यन्ताभावस्तद्विशिष्टं चित्तादात्म्यमपरोक्षतेति तु निष्कर्षः ।

अथवा अज्ञाननानात्वपक्षे (१)तच्चित्सम्बन्धस्यानादित्वेपि घटादिचित्सम्बन्धे तदवच्छेदकत्वं कालविशेषावच्छेदेनैव (२)यथोरीक्रियते—अन्यथा प्रमाकालेपि दिनान्तरविनङ्क्ष्यदज्ञानेन घटो नास्ति न भातीति व्यवहारस्यास्ति भातीति व्यवहाराभावस्य चापत्तेः, तथा एकाज्ञानपक्षेऽपि प्रमातज्जन्योद्बुद्धसंस्कारकालान्यकालावच्छेदेनैव तदुरीक्रियते । तथा च ( केवलेन स्व ) विषयतावच्छेदकत्वसम्बन्धेन योऽज्ञानाभावस्तद्विशिष्टस्य चित्सम्बन्धमात्रस्यैवापरोक्षतात्वेपि न क्षतिः।

एतेनोक्तविशिष्टाभावस्यापरोक्षताघटकत्वे ताद्रूप्येण प्रवृत्त्या-

---

( १ ) अज्ञाननानात्वपक्षे इति । ननु सर्वेषामेकमेवाज्ञानमिति पक्षे जीवभेदेनाज्ञानभेदपक्षेऽपि बाह्यविषयज्ञानमज्ञानस्याभिभवमात्रं करोति न नाशं सकलविषयकाज्ञानस्यैकत्वेनैकज्ञानेन तन्नाशे सर्वाज्ञाननाशापत्तेरिति चेन्न मूलाज्ञानस्यैकत्वेऽपि तूलाज्ञानानां भेदेन तत्रापि नाश्यनाशकभावोपपत्तेरतः यावन्ति ज्ञानानि तावन्त्यज्ञानानि इति पक्षः स्वीक्रियते, न च गौरवं तेषां प्रागभावस्थानीयत्वेन गौरवाभावात् प्रागभावश्चोक्तरीत्या गौरवेण नाङ्गीक्रियत इति ।

( २ ) कालविशेषावच्छेदेनैवेति । यज्ज्ञानाव्यवहितपूर्वं यज्ज्ञानविषयावरकं यदज्ञानं तस्यैव ज्ञानमुच्छेदकं सर्वं चाज्ञानं न सर्वदावृणोतीति भावः ।

दिकारणत्वे गौरवमित्यादिकमुद्धृतम् ।

नच तथाप्युक्तसम्बन्धावच्छिन्नाज्ञानत्वावच्छिन्नप्रतियोगिताका-भाववच्चैतन्यसम्बन्धत्वेन प्रवृत्त्यादौ कारणत्वापेक्षया लौकिकवि-षयताकप्रत्यक्षत्वेन कारणत्वे लाघवमिति वाच्यम् , अज्ञानस्योक्तो योऽभावस्तद्व्यक्तिविशिष्टं यच्चैतन्यनिष्ठं तादात्म्यं तेन सम्बन्धेन शुक्त्या-दिविशिष्टत्वापेक्षया शुक्तित्वाद्यवच्छिन्नलौकिकविषयताशालिप्रत्य-क्षत्वस्यालघुत्वाल्लौकिकत्वरूपाखण्डधर्मस्थाने(स्थले) उक्ताखण्डा-भावव्यक्तेः स्वरूपतो निवेशात्(१)चिन्निष्ठतादात्म्यस्य विषयतात्वेनैव निवेशाच्च अप्रमाण्यज्ञानादिसत्त्वेऽज्ञानसत्त्वेनास्मन्मते तदभावानिवेशेन प्रत्युत लाघवाच्च ।

किं च—एतेन सति भात्यपि शुक्तित्वादौ सत्ताभानाभिला-पप्रवृत्त्यादेः प्रतिबन्धकत्वं नास्ति न भातीत्यभिलापादिजनकत्व-ञ्चाज्ञानस्यावरकत्वमित्यौपनिषदैरुच्यते तथा च. तत्कल्पना-गौरवापेक्षया आन्तरविषये साक्षिसम्बन्धस्य बहिर्विषये चाक्षु-षादिविषयत्वस्य साक्षात्करोमीत्यभिलापप्रवृत्त्यादिनियामकत्वमिति वैरूप्यमपि युक्तमित्यादिकं परास्तम् । अस्तिभातीत्यत्राज्ञानाभावावि-

(१) स्वरूपत इति । लौकिकविषयताशालिप्रत्यक्षस्य प्रवृत्तिप्र-योजकत्वे तव विषयतायां लौकिकत्वमखण्डधर्मो विशेषणं मम तु अज्ञा-नाभाववच्चैतन्यसम्बन्धस्य प्रवृत्तिप्रयोजकतया अज्ञानाभावव्यक्तेः स्वरूपतो निवेशेन साम्यम् प्रत्युत तव अप्रामाण्यज्ञानसत्त्वे प्रवृत्तिवार-णाय अप्रामाण्यज्ञानानास्कन्दितत्वं प्रत्यक्षविशेषणं देयं मम तु तदा-नीमज्ञानस्यैव सत्त्वमिति न देयमिति लाघवमिति भावः ।

शिष्टचैतन्यसम्बन्धस्य व्यवहार्यतया प्रवृत्त्यादिप्रयोजकतया चाज्ञानसत्त्वे तदभावेन इदानीमस्तिभातीत्यादिव्यवहाराद्यसम्भवस्यैवाज्ञानं प्रतिबन्धकमिति वाक्यार्थत्वेनाज्ञानस्य तत्प्रतिबन्धकत्वाकल्पनात् नास्ति न भातीत्यत्राज्ञानस्यैवास्तित्वभानविरोधितया अभिलापादिविषयत्वमात्रस्याभिलापादिजनकत्वशब्दार्थतया तज्जनकत्वाकल्पनात् ।

## अस्तित्वस्य चैतन्यरूपत्वम् ।

अथाज्ञानाभावेनैव चेत् भातीति व्यवहारप्रवृत्त्यादिकार्यं स्यात्तर्हि शुक्त्यादौ परोक्षवृत्त्यापि तत्स्यात् यदि चापरोक्षवृत्त्यैवाज्ञानाभिभवद्वारा तदङ्गीक्रियते तदा परोक्षवृत्त्या अस्तीतिव्यवहारोपि न स्यादिति चेन्न—

यतोऽज्ञानं वैजात्यद्वयवत् (१)तत्रैकं प्रमामात्रस्याभिभाव्य-

(१) वैजात्यद्वयवदिति। अयं भावः आवरणं द्विविधम् एकमसत्त्वापादकमन्तःकरणावच्छिन्नसाक्षिनिष्ठं द्वितीयमभानापादकं विषयावच्छिन्नब्रह्मचैतन्यनिष्ठम्, घटमहं न जनामीति प्रतीत्या मनोघटाद्यवच्छेदेन चैतन्येऽज्ञानानुभवात् । तत्राद्यं परोक्षापरोक्षसाधारणप्रमाणज्ञानमात्रेण निवर्तते वह्न्यनुमितौ सत्यां वह्निर्नास्तीति प्रतीत्यनुदयात् द्वितीयं तु साक्षात्कारेणैव निवर्त्तते यदाश्रयं यदाकारं ज्ञानं तदाश्रयं तदाकारमज्ञानं नाशयतीति नियमात् परोक्षस्थले इन्द्रियविषयसंनिकर्षाभावेनान्तः करणमात्राश्रयत्वात् अपरोक्षस्थले तु विषयेन्द्रियसंनिकर्षात्मकव्यापारजन्यत्वेन ज्ञानस्य

तावच्छेदकमन्यच्च प्रत्यक्षप्रमाया एव, तत्राद्यवैजात्यविशिष्टाज्ञान-स्याभावविशिष्टचैतन्यमस्तित्वसत्तादिशब्दैर्व्यवह्रियते, द्वितीयवैजा-त्यविशिष्टाज्ञानाभावविशिष्टं तु चैतन्यं भानस्फूर्त्यादिशब्दैर्व्यवह्रि-यते प्रवृत्त्यादिकारणञ्च ।

## अस्तित्वस्य सत्ता(जाति)रूपत्वखण्डनम् ।

नचास्तित्वं सत्तासामान्यम्—अन्यथा शुक्तित्वं मे स्फुरतीतीव शुक्तित्वं मेऽस्तीत्यहंकारावच्छिन्नत्वेन चैतन्यरूपमस्तित्वं व्यवह्रियेत, देशकालसम्बन्धित्वं (१)वा अन्यथा—इहेदानीमस्तीति नियतदेश-कालान्वयो न स्यात् चैतन्यस्य सार्वदिकत्वादिति वाच्यं, यतः—सामान्यस्यास्तितात्वेपि शुक्तित्वादिकं मे स्फुरतीतिवत् तन्मेऽस्तीति व्यवहारः स्यात् ।

अथ त्वन्मते मे स्फुरतीत्यत्र स्फुरणे आत्मनो जन्यतासम्ब-न्धो भासते तच्च सत्तायां न संभवति(२) समवायादिसम्बन्धान्तरस्य

---

विषयान्तः करणोभयजन्यत्वेनोभयनिष्ठत्वात् । तथाचाहुः—

परोक्षज्ञानतो नश्येदसत्त्वावृत्तिहेतुता ।
अपरोक्षाधिया नश्येदभानावृत्तिहेतुता ॥

इति ।

(१) देशकालसम्बन्धित्वं वेति । न चेति सम्बध्यते । देशकाल सम्बन्धित्वमपि न सत्त्वमित्यर्थः ।

(२) न सम्भवतीति । एवं च स्फुरणे आत्मजन्यत्वस्य सत्त्वेन शुक्तित्वं मे स्फुरतीतिव्यवहारः सत्तायां चासत्त्वेन शुक्तित्वं मेऽस्तीति न व्यवहार इति भावः ।

भाने त्विष्टापत्तिरिति चेत्तर्हि मन्मते स्फुरणत्वावच्छेदेनाहंकारावच्छिन्नत्वं भासते अस्तितात्वावच्छेदेन तु न तत्सम्भवति परोक्षवृत्तिस्थलीयास्तितायां तदसम्भवात् । अस्तितात्वसामानाधिकरण्येन तद्भाने त्विष्टापत्तिरिति तुल्यम् ।

वस्तुतोऽपरोक्षवृत्त्यभिभाव्यतावच्छेदकवैजात्यस्य सकलपुरुषीयाज्ञानेष्वेकत्वात्तदवच्छिन्नाभावस्य शुक्तित्वं मेस्फुरतीत्यत्र भानासम्भवात् शुक्तित्वादौ पुरुषान्तरीयोक्ताज्ञानसत्त्वादुच्चारयितृरूपास्मच्छब्दार्थीयोक्तवैजात्यवदज्ञानत्वावच्छिन्नाभाववच्चैतन्यं स्फुरणं भवति वाच्यम्, तथा चास्तिताया अपि प्रमासामान्याभिभाव्यतावच्छेदकजातिमदुक्ताज्ञानशून्यचैतन्यत्वेनास्धातुवाच्यत्वादुक्तानुपपत्त्या शुक्तित्वंमेऽस्तीत्यत्राप्यज्ञाने अस्मच्छब्दार्थान्वयस्य वाच्यत्वात् परोक्षधीस्थलेऽपि मेऽस्तीतिव्यवहारः स्यादेव ।

अत एवायं घटोऽन्यं प्रत्यस्ति न तु चैत्रं प्रति तेनाज्ञातत्वादितिव्यवहारस्तथा च किञ्चित्पुरुषीयोक्ताज्ञानशून्यचितः स्फर्यादिधात्वर्थत्वेपि मे इत्यनेनोच्चारयितृपुरुषीयत्वलाभः । उक्तव्यवहारे विवादे तु—उच्चारयितृपुरुषीयोक्ताज्ञानशून्यचित्तः स्फर्यादिधात्वर्थत्वस्वीकारात्पुनरुक्तत्वापत्त्या न मेऽस्तीतिप्रयोगः ।

अभावसामान्यादौ(१) तद्व्यावृत्तसत्तासामान्येनास्तिताव्यव-

---

(१) अभावेति । सत्ताया अस्धात्वर्थत्वे सत्तारहितेऽभावादौ अस्तीतिव्यवहारानुपपत्तिः मम तु चैतन्यस्य अस्धात्वर्थतया तथा व्यवहारः न च अभावः सन् इत्यत्र सत्तासामानाधिकरण्यं द्रव्यं सदित्यत्र च सत्तासमवायो भासते इति वाच्यम् एकरूपस्यसम्भवे वैरू-

हारासंभवः द्रव्यं सत् सामान्यं सदित्येककारव्यवहारयोर्विषयवैरूप्यकल्पनमयुक्तम् , सदसदित्यनुगतसदाकारव्यवहारस्याननुगतदेशकालसम्बन्धित्वेनासम्भवश्चैतन्यातिरिक्तमहादेशकालयोर्मानाभावश्चेति (१)दिक् ।

इहेदानीं शुक्तित्वादिकं नास्ति न भातीत्यत्रेव इहेदानीमस्ति भातीत्यत्राप्यज्ञान एव देशकालावच्छिन्नत्वान्वयः । शुक्तित्वाद्यवच्छिन्नचिद्विषयताकाज्ञानस्य इदंत्वादिविशिष्टदेशकालावच्छिन्नचिदाश्रयताकत्वादेरुपपादयिष्यमाणत्वात् एवं च साक्षिविषयोपरागस्य सहजत्वपक्षेऽपि प्रत्यक्षवृत्तेर्विषयावच्छिन्नचिदाश्रयताकत्वमावश्यकमन्यथा शुक्तित्वादितादात्म्यवत् स्फुरणस्याहंकारावच्छिन्नत्वासंभवात् शुक्तित्वादिचित्तादात्म्ये प्रमाकालेपि प्रमावच्छेदकत्वासमानाधिकरणत्वविषयतावच्छेदकत्वसम्बन्धेनाज्ञानसत्त्वाच्च शुक्तित्वादिकं मे स्फुरतीतिव्यवहारासम्भवात् ।

अथाज्ञानभ्रमयोरेकदेशावच्छिन्नत्वं विना(२) प्रागभावप्रतियोगिभा-

---

प्यस्यानुचितत्वात् देशकालसम्बन्धित्वरूपसत्ताया असधात्वर्थत्वे देशकालानामननुगततया वैरूप्यं स्फुटमेवेति भावः ।

( १ ) देशकालयोर्मानाभावश्चेति । यथा 'दिक्कालौ नेश्वरादतिरिच्येते मानाभावात् तत्तत्कालोपाधिविशिष्टादीश्वरादेव क्षणदिनप्राचीप्रतीच्यादिव्यवहारोपपत्तेः' इति दीधितिकृतः स्वीकुर्वन्ति तथा-बेदान्तिनोऽपि चैतन्यातिरिक्तत्वं न दिक्कालयोरिति स्वीकुर्वन्तीति भावः ।

( २ ) विनेति । प्रागभावप्रतियोगिनोरेकदेशवृत्तित्वनियमेन द्र-

वासम्भवेनाभिभाव्याभिभावकभावासंभवादज्ञानावच्छेदकेनेदंत्वादि-विशिष्टेन शुक्त्यादिदेशेनैव शुक्तित्वादिप्रमाया अवच्छेदो युक्तो न तु शुक्तित्वादिना तथा च प्रत्यक्षवृत्तिप्रमायाः कथं स्वविषयावच्छिन्नत्वनियम इति चेन्न—कपालादिनाशजन्यघटादिनाशजन्यस्य घटादि संयोगनाशस्य(१) स्वप्रतियोगिरूपप्रागभावावच्छेदकानवच्छिन्नत्वेन प्रागभावतत्प्रतियोगिनोरेकावच्छिन्नत्वनियमस्याभावात् घटाद्याधारता-या घटादिप्रागभावाधारतानवच्छेदकेन भूतलावयवादिनेव चैतन्य-निष्ठायां प्रमाधारतायामज्ञानाधारतानवच्छेदकेन शुक्तित्वादिनाव-च्छिन्नत्वसंभवाच्च ।

## परोक्षवृत्तेर्विषयानवच्छेद्यत्वम् ।

अत एव प्रत्यक्षवृत्तिरिवा परोक्षवृत्तिर्विषयावच्छेदेन न चित-माश्रयति किंत्वहंकारावच्छेदेनैव तत्प्रागभावरूपाज्ञानं तु इदन्त्वादि-विशिष्टविषयावच्छेदेनापि चितमाश्रयति तदवच्छिन्नस्वकार्यविषय-कभ्रमजनकत्वात् ।

---

योरेकत्रासत्त्वे अज्ञानस्य प्रागभावरूपता प्रमायास्तत्प्रतियोगिरूप-ता च न स्यात् तथा च निवर्त्यनिवर्तकभावानुपपत्तिरिति भावः ।

(१) घटसंयोगनाशस्येति । अभावस्य त्रितयप्रतियोगिकत्व-वादिमते घटः घटप्रागभावः घटध्वंसश्च समनियततया एक एव एवञ्च घटसंयोगनाशस्य यः प्रतियोगी घटसंयोगः स घटसंयोगप्रागभावरूपः घटे, घटसंयोगनाशश्च भूतले, न घटे घटस्य कपालनाशेन नष्टत्वात् इति प्रतियोगिप्रागभावयोरेकावच्छिन्नत्वनियमो न सम्भवतीति भावः स्वं ध्वंसः तत्प्रतियोगिरूपो यः प्रागभावः घटसंयोगप्रागभाव इत्यर्थः । शुक्तित्वस्य प्रमावच्छेदकत्वं दृष्टान्तेनोपपादयति घटादीति ।

न च परोक्षवृत्तिरपि प्रत्यक्षवृत्तिरिव विषयावच्छेदेन कुतो न जायत इति वाच्यम् , अवच्छेदकतासम्बन्धेन चाक्षुषत्वादिना चक्षुरादिसंप्रयोगकार्यत्वाङ्गीकारेण प्रत्यक्षवृत्तेरिन्द्रियसंप्रयुक्तावच्छिन्नत्वेपि परोक्षवृत्तेस्तथात्वनियामकसामग्र्यकल्पनात् ।

## प्रत्यक्षवृत्तेर्विषयावच्छेद्यत्वम् ।

न च विषयतासम्बन्धेनैव कार्यत्वाङ्गीकारसम्भवेन प्रत्यक्षवृत्तेरपि तद(१)सिद्धमिति वाच्यम् , वृत्त्यवच्छेदकत्वासमानाधिकरणत्वाद्युक्तनिर्वाहासंभवस्योक्तत्वात् अवच्छेदकतासम्बन्धेन कार्यत्वानङ्गीकारे विनिगमकाभावाच्च, परोक्षवृत्तेस्त्वतीतानागतव्यवहितार्थावच्छिन्नत्वासंभवस्यैव परामर्शादिकार्यताया अवच्छेदकतासम्बन्धानवच्छिन्नत्वे विनिगमकत्वात् ।

अथ(२)प्रत्यक्षवृत्तेरिन्द्रियसम्बद्धविषयकत्वसिद्धये विषयतासम्बन्धेनेन्द्रियसंप्रयोगकार्यत्वस्यावश्यकत्वमेवावच्छेदकतासम्बन्धस्य तदनवच्छेदकत्वे विनिगमकम्—न च चक्षुरादिप्रमाणस्य आलोकरूपस्पर्शमहत्वादेर्गुरुत्वादिप्रतिबन्धकाभावस्य गन्धरसश-

(१) तदसिद्धमिति । अवच्छेदकतासम्बन्धेन कार्यत्वमसिद्धमित्यर्थः ।

(२) अथेति । यदि प्रत्यक्षवृत्तेरवच्छेदकतासम्बन्धेन कार्यता स्यात् तर्हि प्रत्यक्षवृत्तेरिन्द्रियसंप्रयोगकार्यता किमित्यङ्गीकर्तव्याऽतो ज्ञायते यत् अवच्छेदकतासंबन्धेन प्रत्यक्षवृत्तेः कार्यता नास्तीत्यर्थः । इन्द्रियसंप्रयोगकार्यतामेव खण्डयति नचेति । तथा च अवच्छेदकतया प्रत्यक्षवृत्तिकार्यत्वमभ्युपेयमित्यर्थः ।

ब्दादिविषयस्य वा विषयतया चाक्षुषादिकं प्रति हेतुत्वावश्यकत्वाद्विषयतया संप्रयोगकार्यत्वं नावश्यकमिति वाच्यं चाक्षुषादेः सविषयकत्वसिद्धये चक्षुरादेः संप्रयोगस्य वा कार्यत्वं विषतयेत्यत्र विनिगमनाविरहादिति चेन्न, सधर्मितावच्छेदकविशिष्टबुद्धौ बाधाभावादिरूपाया विशिष्टधीमात्रे अवृत्तित्वज्ञानाभावादिरूपायाश्च सामान्यसामग्र्याः कार्यताया अवच्छेदकतासम्बन्धेन वक्तुमशक्यतया विषयतानिवेशस्य तस्यामावश्यकतया तत एव चाक्षुषादौ सविषयकत्वस्य सिद्धत्वेन संप्रयोगादिजन्यताया विषयतासम्बन्धेनानावश्यकत्वात् ।

न च निर्विकल्पकप्रत्यक्षस्येन्द्रियसंप्रयुक्तविषयकत्वमुक्तरीत्या न संभवतीति तदनुरोधेन संप्रयोगादिकार्यत्वं विषयतयाऽवश्यकमिति वाच्यम्, शाब्दनिर्विकल्पके मानाभावाद्विशिष्टबुद्धौ विशेषणज्ञानस्याहेतुत्वात् ।

न च जातिमान् घट(१)इत्यादिज्ञानस्य द्विविधविषयतानियमाय निरवच्छिन्नघटत्वादिविषयताकज्ञानस्य निरवच्छिन्नघटत्वादिप्रकारताकज्ञाने हेतुत्वमावश्यकम् अन्यथोपस्थितजातित्वेनैव तत्र घटत्वस्य विषयता स्यान्न निरवच्छिन्नेति वाच्यम्, जातिविशेषेण संप्रयोगादेरेव हेतुत्वात् अन्यथा कारणतावच्छेदके विशेषणविशेष्यत्वस्याविनिगम्यत्वात् अनन्तनिर्विकल्पककल्पनेन गौरवाच्च ।

---

(१) द्विविधविषयतेति । घटत्वनिष्ठा सावच्छिन्ना निरवच्छिन्ना च विषयता द्विविधेति बोध्यम् ।

## वृत्तीनां ज्ञानत्वस्यसविषयकत्वस्यचाभावः ।

वस्तुतस्तु चैतन्यस्यैव ज्ञानत्वेनाध्यासिकस्य तत्संबन्धस्य विषयतारूपस्य जडेषु क्लृप्तत्वेन च वृत्तीनामज्ञानवत्तद्विषयीभूतचिद्विषयकत्वेऽपि ज्ञानत्वे जडविषयकत्वे वा मानाभावः, परमतेऽपि ज्ञानेऽनुव्यवसायविषयकत्वस्य क्लृप्तत्वात् वृत्तीनां तु ज्ञानाभिव्यञ्जकत्वमात्रमज्ञानाभिभावकत्वात्, परमते मनोयोगादीनां ज्ञानजनकत्ववदज्ञानविषयचिद्विषयकत्वेनैव तासां प्रमात्वोपपत्तेः, पूर्णानन्दज्ञानतदभिभावकवृत्त्योश्चिद्विषयकत्वस्य क्लृप्तत्वेनाज्ञानतदभिभावकवृत्त्यन्तरयोरपि तथा कल्पनात् तत्र वृत्तेः संसर्गविशेषिततयानुभवस्थले एकानुयोगिकापरप्रतियोगिकसंसर्गावच्छेदेनैव चैतन्यविषयताः यथा इमां शुक्तिं पश्यामि घटीयां कर्मतां शृणोमि पर्वतं वह्निसंयुक्तमनुमिनोमीत्यादौ संसर्गविशेषिततया तदननुभवस्थले तु निर्विकल्पकवृत्तेः क्वचित्तत्तद्विषयव्यक्त्यवच्छेदेनैव यथा सोऽयमित्यादिवाक्यजन्यबोधादौ अखण्डव्यक्तिमात्रावच्छेदेन क्वचिद्विषयानवच्छिन्नैव सा यथा महावाक्यादेस्तात्पर्यानुरोधेनाखण्डचिन्निष्ठा विषयताः ।

अथ यत्र विषयविशेषितवृत्तेर्जन्यतादिकं तत्र प्रत्यक्षवृत्तेर्विशिष्टविषयावच्छिन्नत्वेन जन्यतादेर्युक्तत्वेपि परोक्षवृत्तेर्विशिष्टविषयावच्छिन्नविषयताकत्वेन जन्यत्वादिकल्पने गौरवस्यायुक्तत्वात्सविषयकत्वमपि वृत्तेर्युक्तमिति चेन्न, इदं हि गौरवं सविषयकज्ञानस्यनित्यत्वकृतं तत्र च महदेव लाघवं पूर्वमेव दर्शितम् ।

अथ विषयताया नित्यज्ञानरूपायां दृशि दृश्यतादात्म्यरूपायाः

क्लृप्तत्वेपीच्छादिभिरिव परोक्षवृत्त्यापि लाघवाद् दृश्यानां साक्षात्सम्बन्धः कश्चन कल्प्यत इति चेत् कल्प्यतां यदि सम्भवति, कथं न सम्भवतीति चेत् अतीतानागतदृश्यानां परोक्षवृत्तीनां च भिन्नदेशकालत्वेन सम्बन्धासम्भवात् अन्यथा सर्वेषामेव मिथः सम्बन्धस्य वक्तुं शक्यतया भ्रममात्रोच्छेदप्रसङ्गात् ।

अथ भिन्नदेशकालत्वाभावस्य संयोगसमवायादिसत्यसम्बन्धव्यापकत्वेन गृहीतत्वात्तदभावात्सत्यसम्बन्धाभावनिश्चयेपि मिथ्यासम्बन्धः कश्चन कल्प्यत इति चेन्न वह्निमनुमिनोमीत्यादिप्रतीतेर्वन्ह्याद्यवच्छिन्नचिद्विषयताकानुमित्यादिविषयकत्वेनोपपत्तेः (१) सम्बन्धान्तराकल्पकत्वात् अन्यथा सर्वत्र साक्षात्सम्बन्धकल्पनया परम्परासम्बन्धोच्छेदापत्तेरज्ञानविषयचिद्विषयकत्वं विना वृत्तेरज्ञातज्ञापकत्वरूपप्रमात्वानुपपत्तेः, अज्ञातं वह्न्यादिसत्त्वं मयानुमितमित्याद्यनुभवेन वह्न्याद्यवच्छिन्नचिद्रूपसत्ताविषयकत्वस्य परोक्षवृत्तौ ग्रहणात् , नेह नानास्तीत्यादिश्रुतिबाधितत्वेन जडानां प्रमाणवेद्यत्वानुपपत्त्या श्रुतेरनवच्छिन्नचितीव (२) प्रत्यक्षादीनामवच्छिन्नचित्येव विषयत्वौचित्यात्

---

(१) उपपत्तेरिति । एवं च वह्निना वृत्तेः संबन्धो नावश्यक इति भावः ।

(२) अनवच्छिन्नचितीवेति । तत्त्वमसीत्यत्र वाच्यार्थानां तत्कालादिविशिष्टानामभेदान्वयानुपपत्तिप्रतिसन्धानाल्लक्षणया निर्विकल्पकबोधार्थानुकूलं निर्विकल्पकं स्मरणं तदादिपदात् एवं च निरवच्छिन्नचित एव तत्त्वमस्यादिवाक्यबोध्यत्वम् । लक्षणया तद्बोधार्थमेव पदान्तरोपन्यासः । पदानां शक्त्यैव सप्रकारकधीजनकत्वनियमो न तु लक्षणयापि इति निष्प्रकारकशाब्दबोधजनकत्वम् लक्षणया पदज-

अज्ञानप्रमयोः समानविषयत्वौचित्याच्च अज्ञानस्य च चिद्विषयकत्वा-वश्यकत्वं वक्ष्यते । किञ्च मम पर्वतवह्निसंयोगावच्छिन्नविषयताकानु-मितित्वादिना कार्यत्वादिकं तव तु पर्वतविशेष्यतावच्छिन्नसंयोगसंस-र्गतावच्छिन्नवह्निविधेयताकानुमितित्वादिना तथा च ते महदेव गौरवम्

न च पर्वतत्वाद्यवच्छिन्नावच्छेदकतानिरूपितावच्छेदकता त्व-यापि निवेश्या अन्यथेतरावच्छिन्नावच्छेदकतानिरूपितावच्छेदकता या वारणासम्भवात् यदि च विशिष्टसंयोगस्य केवलसंयोगाद्यतिरिक्त-त्वस्वीकाराद्विशिष्टसंयोगनिष्ठावच्छेदकतामात्रमनतिप्रसक्तं निवेश्यते न तु तदवच्छेदकतापोत्युच्यते तदा मयापि तथा स्वीकृत्य विशिष्ट-संयोगविषयता निवेश्येति वाच्यम् , भ्रमानुमित्यादिस्थले मन्मते विशिष्टसंयोगस्य प्रातीतिकस्य सत्त्वेनोक्तनिवेशस्य सम्भवेऽप्यन्य-थाख्यातिमते तदसम्भवात् , तस्मात्पर्वतवह्न्यादिसम्बन्धावच्छिन्न-विषयताकानुमितित्वादिना कार्यत्वादिस्वीकारे बाधकाभावः, अत एव सर्वप्रमाणवेद्येऽस्मिन् ब्रह्मरूपे व्यवस्थिते इति वार्तिकाद्युक्तिः सङ्गच्छते ।

इच्छादेरप्युक्तरूप एव विषयैः सम्बन्धः, आस्तां वा नि-रूपकत्वाख्य आकारापरनामा सम्बन्धः तस्य च विषयतात्वे माना-भावो ज्ञानाज्ञानयोरेव सविषयकत्वात् , अतएव प्रकाशस्य सतस्त-दीयतामात्रनिबन्धनः स्वभावविशेषो विषयतेति बौद्धाधिकारीय-वाक्ये विषयतालक्षणे प्रकाशपदोपादानं ज्ञानस्यैव विषयता स्वभावि-

---

न्याया निष्प्रकारकोपस्थितेः सत्त्वात् लक्ष्यतावच्छेदकविशिष्टे एव लक्ष-णेतिनियमस्तु नास्ति निर्धर्मितावच्छेदकबोधस्याङ्गीकारादिति भावः ।

की इच्छादेस्तूक्तज्ञानौपाधिकीत्याशयेनेति वर्द्धमानादयः ।

एवञ्च परोक्षवृत्तिस्थले वृत्त्यवच्छिन्नचिति विषयस्यानध्यस्तत्वेऽपि यत्र चिति तस्याध्यासस्तदभिन्नत्वात्साक्षिणो विषयज्ञानत्वं वाच्यम् । तथा च वृत्त्यभावकालेपि वह्निं जानामीत्यादिधीः स्याद् वृत्त्यवच्छिन्नस्य तत्त्वे तु वृत्तेरेव तत्त्वमुचितम् सुखादौ च वृत्त्यभावात्तज्ज्ञानं दुर्वचं स्यादित्यपास्तम् उक्तरीत्या असत्त्वापादकाज्ञानविषयरूपावरणावच्छेदकं यद्विषयतादात्म्यं तद्वच्चिदभिन्नसाक्षिण एव जानामीत्यादिव्यवहारनियामकत्वात्तत्तदन्तःकरणावच्छिन्नयोरेवावरणवृत्त्योरभिभाव्याभिभावकत्वात्तत्तदन्तःकरणावच्छेदेन वृत्त्यभावकाले तादृशव्यवहारापत्त्यसम्भवात्—तस्मात् सुखादौ साक्षात्कारादिव्यवहारानुरोधेन यत् साक्षादपरोक्षाद् ब्रह्म य आत्मा सर्वान्तरः अयमात्मा अनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन इत्यादिश्रुत्या चात्मन एव साक्षात्कारत्वज्ञानत्वाद्यावश्यकत्वे आत्मनीव चाक्षुषादिवृत्तावपि साक्षात्कारत्वज्ञानत्वादिकल्पनं निर्युक्तिकमेव ।

## अज्ञानस्यभावरूपत्वसमर्थनम् ।

नन्वज्ञानं प्रकल्प्योक्तरीत्या तस्य साक्षात्कारादिव्यवहारनिर्वाहकत्वकल्पनात् अवश्यक्लृप्तचाक्षुषादेरेव साक्षात्कारत्वज्ञानत्वादिकल्पनमेव युक्तमिति चेन्न अज्ञानस्यावश्यकल्प्यत्वात्—सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विदन्तीत्यादिश्रुत्या सुषुप्तौ ब्रह्मस्फुरणाभावमुक्त्वा अनृतेन हि प्रत्यूढा इत्यादिश्रुत्या अनृतशब्दिताविद्यारूपेणाज्ञानेन प्रत्यूढशब्दिताच्छितत्वस्य तत्र हेतुत्वोक्तेः ।

एवं नीहारेण प्रावृता अविद्यायामन्तरे वर्त्तमाना जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवतीत्यादिश्रुतेः, अज्ञानेनावृतं ज्ञानमित्यादिस्मृतेश्च ।

नचानृतादिशब्दैर्ज्ञानाभाव एव उक्त इति वाच्यम्, सत्यात्मक-ऋतविरोधिन्येवानृतशब्दस्यानृतं शुक्तौ रजतमित्यादौ प्रयोगात् ज्ञानाभावस्य स्वस्मिन्नेव हेतुत्वोक्त्यसम्भवात् मन्मते तु सुषुप्तस्य यदभास्यनिर्विशेषब्रह्माभिन्नत्वेऽप्यज्ञानभावविशिष्टस्य ब्रह्माभिन्नस्य साक्षिण एव ब्रह्मस्फुरणत्वमित्यभिप्रायेण तदुक्तिसम्भवात् । यदभावविशिष्टस्यैव यस्य व्यवह्रियमाणत्वं तस्यैव तत्रावारकत्वव्यवहारात् यथावरककपालादेर्दीपादौ । न च ब्रह्मणि वृत्तिज्ञानाभावस्तथा, तत्सत्त्वेपि जीवन्मुक्तिकाले ब्रह्मणो व्यवहारात् । चैतन्यस्य ज्ञाने स्वाभावस्यावरकत्वोक्तेर्निरालम्बनत्वापाताच्च ।

किञ्च—स्वस्वरूपं न जानामि पुरोवर्तिनं न जानामि त्वदुक्तमर्थं न जानामीत्यानुभवैर्भावरूपाज्ञानावगाहनात् तदपलापासम्भवः । न च तत्रापि ज्ञानाभावो विषय इति वाच्यम्, प्रतियोगिज्ञानसत्त्वे स्वरूपादिज्ञानस्यैव सत्त्वेन तदभावप्रत्यक्षासम्भवात् तदसत्त्वे त्वभावग्राहकसामग्रीविरहात् ।

न च स्वरूपादिज्ञानसत्त्वे स्वरूपाद्यज्ञानमेव नास्ति तदसत्त्वे तु विशेषणावच्छेदकप्रकारकज्ञानाद्यभावेन तदनुभवासम्भव इति भावरूपमज्ञानमपि कथं ग्राह्यम् यदि च साक्षिणो नित्यत्वेन तत्रोक्तज्ञानादेरहेतुत्वेन तस्य भावरूपाज्ञानविषयकत्वसम्भव इत्युच्यते—तर्हि ज्ञानाभावविषयकत्वमपि तस्य तथैव सम्भवतीति वाच्यम्, ज्ञानाद्य-

भावस्य साक्षिभिन्नेपि प्रतीयमानत्वात्साद्यनध्यस्तत्वेन साक्षिसम्बन्धनिर्वाहकप्रमाणवृत्तिं विना साक्षिवेद्यत्वासम्भवात् ।

अथाविद्योपहितचैतन्यस्यैव साक्षित्वपक्षे अन्तःकरणावच्छेदेनेव घटावच्छेदेनापि ज्ञानाद्यभावस्य साद्यध्यासस्वीकारात् साक्षिमात्रवेद्यत्वसम्भवः अवध्यादिज्ञानस्य दीर्घत्वादिव्यवहार इव अभावव्यवहारे तत्तदधिकरणग्राहकसामग्र्या हेतुत्वात् तदभावकाले तस्य नापत्तिः इत्थमेव गगनादेः साक्षिवेद्यत्वे सिद्धान्तसिद्धेपि तद्व्यवहारे तत्तदधिकरणग्राहकचक्षुराद्यपेक्षेति चेन्न, अभावबोधकवाक्यत्वादिरूपतद्व्यवहारत्वापेक्षया अभावप्रत्यक्षत्वस्यैव लघुत्वेन जन्यतावच्छेदकत्वौचित्येन प्रतियोग्यनुयोगिनिर्विकल्पोत्तरमभावस्य परैरपि प्रत्यक्षत्वानङ्गीकारेण चाभावप्रत्यक्षस्य नित्यसाक्षित्वासम्भवात् , अत एव गगनादेश्चक्षुरादिगम्यत्वौचित्यात् भट्टाचार्यादिमते तथाङ्गीकारात् ।

अथेन्द्रियसम्बद्धविशेषणतया अभावप्रत्यक्षे जननीये तस्य प्रतियोग्यनुयोग्यविशेषितस्यालीकतया तद्विशेषितस्य प्रतियोग्यनुयोगितावच्छेदकविशिष्टवैशिष्ट्यगोचरप्रत्यक्षत्वेन प्रतियोग्यनुयोगितावच्छेदकप्रकारकज्ञानजन्यत्वादभावप्रत्यक्षत्वेन न तादृशज्ञानजन्यत्वमिति चेन्न, तादृशवैशिष्ट्यविषयकप्रत्यक्षत्वेन जन्यत्वाङ्गीकारेपि स्वरूपं न जानामीत्यादिप्रत्यक्षस्याभावविषयकत्वे उक्तानुपपत्तितादवस्थ्यात् इन्द्रियसम्बद्धविशेषणतया इदन्त्वादिप्रकारेणाभावप्रत्यक्षस्य समवायादिप्रत्यक्षस्य च प्रतियोग्याद्यविशेषितस्याप्युदयेन प्रतियोगितावच्छेकादिप्रकारकज्ञाने द्रव्याद्यसमवेतस्य प्रत्यक्षं प्रति

कारणीभूतेन्द्रियसम्बद्धविशेषणताऽव्याप्यसामग्रीत्वासम्भवेन नेत्थाकारकाभावप्रत्यक्षवारणार्थं प्रतियोग्यादिज्ञानस्याभावस्वप्रकारकप्रत्यक्षं प्रति कारणत्वस्यावश्यकत्वाच्च, अभावस्यानुपलब्धिप्रमाणगम्यत्वेपि प्रतियोग्यादिनिर्विकल्पोत्तरमभावानुपलब्धज्ञानस्यादर्शनेन प्रतियोगितावच्छेदकादिप्रकारकज्ञानस्य तत्र हेतुत्वावश्यकत्वात् ।

अथ स्वरूपं न जानामीत्यादौ स्व(रूप)निष्ठनिरवच्छिन्नविषयताशालिनो मुक्त्युपधायकस्य वा, पुरोवर्तिनमित्यादाविदन्त्वान्यद्रव्यत्वादिव्याप्यधर्मनिष्ठनिरवच्छिन्नप्रकारताकस्य, त्वदुक्तार्थमित्यादौ त्वदुक्तार्थत्वव्याप्यधर्मनिष्ठनिरवच्छिन्नविषयताकस्य, ज्ञानस्याभावो विषयस्तथा च सामान्यतः स्वरूपादिज्ञानस्य कारणीभूतस्य सत्त्वेपि तादृशाभावधीसम्भव(१) इति चेन्न,

सोऽहमित्यादिवाक्यजन्यस्य स्वरूपनिष्ठोक्तविषयताकज्ञानस्य सत्त्वेपि स्वरूपं न जानामीत्यनुभवात्(२), पामराणां मुक्त्युपधायकत्वाद्यनुपस्थितावपि तत्सत्त्वाद्यदि मुक्त्युपधायकज्ञानप्रतियोगिकसमवायेन ज्ञानसामान्याभावो विषयस्तथापि पामराणां तादृशज्ञानत्वमविषयी-

---

(१) धीसम्भव इति। एवं च स्वरूपज्ञानस्य सत्त्वे एव स्वरूपं न जानामीत्यनुभवानुपपत्तिः असत्त्वे प्रतियोगिज्ञानरूपकारणाभावेन तदनुपपत्तिरिति दूषणस्य नावकाशः सामान्यतः स्वरूपज्ञानस्य सत्त्वेऽपि मुक्त्युपधायकस्वरूपज्ञानाभावस्य सम्भवादिति भावः ।

(२) अनुभवादिति । तथा च यदि स्वरूपं न जानामीत्यस्य स्वरूपनिष्ठनिरवच्छिन्नविषयताकज्ञानाभावो विषयः स्यात् तदा सोऽहमिति वाक्यजन्यतादृशज्ञानसत्त्वे न स्यात् विरोधिनः प्रतियोगिनो विद्यमानत्वात् तथा च भावरूपमज्ञानं तादृशप्रतीतेर्विषय इति निष्कर्षः ।

कृत्यापि जायमानस्य स्वरूपं न जानामीत्यनुभवस्यानुपपत्तेः तादृशानुभवे तादृशज्ञानत्वविषयीकरणे तदुत्तरं तद्विशिष्टबुद्ध्याद्यापत्तेश्च, इदं पृथ्वीत्यादिज्ञानकालेपि शुक्त्यादाविदं न जानामीत्यादिना शुक्तित्वाद्यज्ञानानुभवात्, त्वदुक्तार्थत्वव्याप्ययत्किञ्चिद्धर्मनिष्ठानवच्छिन्नविषयताकधीसत्त्वेपि त्वदुक्तार्थं न जानामीत्याद्यनुभवात् त्वदुक्तार्थत्वस्य वस्तुगत्या यद्व्याप्यं तन्निवेशे यदा घटत्वेन पटस्त्वदुक्तस्तदा पटरूपत्वदुक्तार्थत्वव्याप्यपटत्वादिज्ञानसत्त्वे तादृशानुभवानुपपत्तेः विसंवादिवाक्यस्थले विशिष्टार्थाप्रसिद्ध्या त्वदुक्तविशिष्टार्थत्वव्याप्याप्रसिद्धेः उक्तव्याप्यत्वस्य प्रतियोगितावच्छेदके निवेशे विशिष्टवाक्यार्थ(त्व)व्याप्यत्वज्ञानस्य पूर्वमवश्यमपेक्षायां तदसत्त्वे तादृशानुभवस्य जायमानस्यानुपपत्तेरनिवेशे च विशिष्य तत्तद्धर्मानुपस्थित्या तन्निष्ठानवच्छिन्नविषयताकज्ञानत्वावच्छिन्नाभावप्रत्यक्षानुपपत्तेः ।

किञ्च(१) अभावस्य साक्षिण्यध्यासाङ्गीकारेपि विषयविशेषितज्ञानाभावस्य न साक्षिवेद्यत्वसम्भवः, साक्ष्ययोग्यधर्मघटितधर्मावच्छिन्नाभावस्य साक्ष्ययोग्यत्वात् अन्यथा सुखाद्यभावस्येव गुरुतरघटाद्यभावस्यापि साक्षियोग्यत्वापत्तेः ।

ननु साक्षियोग्यत्वं क्वचित्सहजत एवावरणाभावात्(२)

---

(१) किंचेति । अविद्योपहितचैतन्यस्य साक्षित्वपक्षे घटाद्यवच्छेदेन ज्ञानाद्यभावस्य साक्षिण्यध्यासस्वीकारेऽपि घटादेः साक्ष्ययोग्यत्वेन घटज्ञानाभावस्य न साक्षिभास्यत्वमिति भावः ।

(२) आवरणाभावादिति । अयं भावः अनावृते स्वच्छे सुखादौ स्वतः (वृत्तिं विना) आवृतेऽस्वच्छे शुक्तिरजतादौ अविद्यावृत्त्या साक्षिभास्यत्वमिति तदुक्तं सिद्धान्तबिन्दौ 'ब्रह्मणश्च वृत्तिमन्तरे-

यथा सुखादौ क्वचिच्चावरणाभिभावकप्रत्यक्षवृत्तियोग्यत्वात् ( यथा ब्रह्मणि ) तथा च–धर्माधर्मगुरुत्वादेरावृतत्वेन प्रत्यक्षवृत्त्ययोग्यत्वेन च साक्ष्ययोग्यत्वात् तज्ज्ञानाभावस्य साक्ष्ययोग्यत्वेपि घटादेः प्रत्यक्षवृत्तियोग्यत्वेन साक्षियोग्यत्वात् तज्ज्ञानाभावस्य साक्षिवेद्यत्वे बाधकाभावः, वस्तुतो ज्ञानविशेषणतया सर्वस्यापि साक्षियोग्यत्वाद् गुरुत्वादिज्ञानाभावस्यापि तथेति(१) चेन्न–घटादिज्ञानत्वस्य घटादिविषयताशालित्वविशिष्टज्ञानत्वरूपतया तत्र सकलपुरुषीयज्ञानानां वैशिष्ट्यघटकत्वेन तादृशज्ञानसाधारणविषयतानां च घटकतया तदवच्छिन्नाभावस्य साक्ष्ययोग्यत्वावश्यकत्वात् , न हि पुरुषान्तरीयज्ञानतद्विषयतादिकं पुरुषान्तरसाक्षिवेद्यं सम्भवति ।

न च विषयताया ज्ञानभेदेप्यैक्याङ्गीकारेण एकस्या एव तस्याः सकलपुरुषसाक्षियोग्यत्वात्(२) घटादिविषयताकत्वज्ञानत्वयोरेकत्र

---

णैव सर्वदा भानं स्यात् चैतन्यस्य तत्तदाकारत्वाभावात् तदभावश्च स्वच्छेऽपि ब्रह्मचैतन्ये आवरणात् अनावृतेऽपि शुक्तिरजतादावस्वच्छत्वात् धर्माधर्मादौ तु अस्वच्छत्वादावृतत्वाच्च तेन स्वच्छेऽप्यावृते ब्रह्मणि प्रमाणवृत्त्या तदाकारता अनावृत्तेऽप्यस्वच्छे शुक्तिरजतादौ अविद्यावृत्त्या तदाकारता अनावृते स्वच्छे सुखदुःखादौ तु स्वतः' इति ।

( १ ) तथा—साक्षिवेद्यत्वे बाधकाभावः ।

( २ ) योग्यत्वादिति । तथा च विषयताया पुरुषान्तरीयज्ञानतद्विषयतयोः पुरुषान्तरसाक्षिवेद्यत्वे इष्टापत्तिरिति भावः । ननु प्रत्येकं ज्ञानविषयतयोः साक्षियोग्यत्वेऽपि विशिष्टस्य साक्ष्ययोग्यतया न तादृशज्ञानस्य साक्षियोग्यत्वमत आह घटादीति तथा च प्रत्येकमेवाव-

प्रतियोगितायां मिलित्वावच्छेदकत्वमितिवैशिष्ट्यस्यावच्छेदकशरीराप्रविष्टत्वाच्च नोक्तदोष इति वाच्यम्, विषयतायाः समवायवत् प्रतियोग्यनुयोगिभेदेन भेदावश्यकत्वात् अन्यथा घटत्वेनैतद्धटमात्रविषयकज्ञाने एतद्धटीयत्वस्येव तद्धटीयत्वस्यापि व्यवहारापत्तेर्घटत्वावच्छिन्नविषयतारूपस्य तदेतद्धटयोः सम्बन्धस्य तत्राविशेषात्, स्वावच्छेदकधर्मसम्बन्धभेदेनावच्छेदकताया भेदावश्यकत्वेन व्यासज्यवृत्तित्वानुपपत्तेः, प्रत्येकस्य चातिप्रसक्तत्वादवच्छेदकवैशिष्ट्यस्यावश्यं घटकत्वाच्च।

अथ यथा—वृत्तिज्ञानाविशेषणतया सर्वं साक्षिभास्यं सिद्धान्ते उच्यते तथैवाभावविशेषणज्ञानविशेषणतया सर्वं साक्षिभास्यमुच्यतामिति चेन्न-वृत्तिज्ञानाज्ञानयोरिव तद्गते घटादिविषयकत्वादिधर्मे आवरणाभावेन आवरणानवच्छेदकस्य साक्षिसम्बन्धस्य सत्त्वात्साक्षिभास्यत्वसम्भवेपि अभावस्य साक्ष्य(क्षि)योग्यघटादिविषयकज्ञानत्वावच्छिन्नाभावत्वेन सामान्यत एवायोग्यत्वकल्पनात्, साक्षिणा घटादिज्ञानाभावव्यवहारासम्भवात् अन्यथा मयि घटाज्ञानं साक्षात्करोमीतिवत् पटे घटाज्ञानं साक्षात्करोमीत्यादिव्यवहारापत्तेः(१)।

न च घटादिविषयकज्ञानप्रतियोगिकत्वेप्यभाव (इव)निष्ठे आवरणं नाङ्गीक्रियतां तथा च तत्राप्यावरणानवच्छेदकसाक्षिसम्बन्धरूपसा-

---

च्छेदकं न तु तयोर्वैशिष्ट्यमिति तदभावस्य साक्षियोग्यत्वे बाधकाभाव इति।

(१) व्यवहारापत्तेरिति। पटेऽपि घटज्ञानाभावस्य सत्त्वात् मम तु भावरूपमज्ञानं न पटनिष्ठमिति नोक्तदोष इति भावः।

क्षिभास्यत्वसत्त्वेपि पटाद्यवच्छिन्नानुयोगिताकत्वरूपे अभावधर्मे साक्षिसम्बन्धस्यावरणावच्छेदकत्वाङ्गीकारात् पटादौ घटाद्यज्ञानं साक्षात्करोमीतिव्यवहाराभाव इति वाच्यम् , पटाद्यनन्ताधिकरणावच्छिन्नानुयोगिताकत्वेषु साक्षिसम्बन्धानामनन्तावरणावच्छेदकत्वकल्पनापेक्षया ज्ञानाभावस्य साक्ष्ययोग्यत्वकल्पनाया एव युक्तत्वात् ।

## भ्रमे बाधाभावतत्सामग्र्यभावयोः कारणत्वे गौरवम् ।

किञ्च—इदं रजतमित्यादिभ्रमस्थले इदन्त्वाद्यवच्छिन्नविशेष्यतानिरूपितरजतादिभेदप्रकारताशालित्वे सति यस्तत्तदप्रामाण्यज्ञानाद्यभावकूटवच्चाक्षुषादिनिश्चयस्तत्त्वावच्छिन्नाभावत्वेन बाधाभावस्य(१) कारणत्वं वाच्यम् तत्र चावच्छेदकघटकानामनन्तानां विशेषणविशेष्यभावे कामचारेणानन्तहेतुत्वापत्त्या गौरवम् एवं(२) तादृशनिश्चयसामग्र्यभावत्वेनापि हेतुत्वं वाच्यमन्यथा तादृशनिश्चयोत्पत्तिकाले तादृशभ्रमोत्पत्त्यापत्तेस्तथा च तेनाप्यतिगौरवम् ।

न च कार्यसहभावेनोक्तनिश्चयाभावत्वेन(३) हेतुत्वाङ्गीकारान्नो-

(१) कारणत्वमिति। इदं रजतमिति भ्रमं प्रति इदं न रजतमिति बाधनिश्चयाभावः कारणम् इति भावः ।

(२) एवमिति । इदन्न रजतमिति बाधनिश्चयोत्पत्तिकाले इदं रजतमिति भ्रमवारणाय इदं न रजतमिति बाधनिश्चयसामग्र्यभावः कारणमित्यर्थः ।

(३) कार्यसहभावेनेति। कार्यकालवृत्तित्वविशिष्टस्य इदं न रजतमिति बाधनिश्चयाभावस्य हेतुत्वमित्यर्थः । तथा च इदं न रजतमिति बाधनिश्चयोत्पत्तिकाले बाधनिश्चयाभावस्य सत्त्वेऽपि तदुत्तरं इदं

क्तसामग्र्यभावस्य हेतुत्वमिति वाच्यम् , कार्यकालवर्तित्वविशिष्टस्य कार्यात्प्रागसत्त्वेन तत्त्वेन कारणत्वासम्भवात् ।

अथोक्तनिश्चयाभाववत्त्वे सति यः सामग्रीमत्क्षणोत्तरक्षणस्तत्त्वं कार्योत्पत्तिव्याप्यम्(१) , अथवा कार्योत्पत्तिकालावच्छेदेन तत्प्राक्कालावच्छेदेन च यः कार्यवद्देशनिष्ठः कारणतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकोऽभावस्तत्प्रतियोगितानवच्छेदकोक्तनिश्चयाभावत्वमेवोक्तनिश्चयाभावस्य कारणत्वमिति कार्यसहभावेन कारणत्वमिति वाक्यस्यार्थ इति चेन्न—अन्याविशेषितस्यैव सामग्रीक्षणोत्तरक्षणत्वस्य कार्योत्पत्तिव्याप्यत्वाङ्गीकारात् अन्यथा दण्डादेर्हेतुत्वमनङ्गीकृत्य दण्डचक्रादिसामग्रीमत्क्षणोत्तरक्षणत्वस्य घटाद्युत्पत्तिव्याप्यत्वमङ्गीकृत्य दण्डादिहेतुत्वस्यापि विलोप्यतापत्तेः।

यदि चान्वयव्यतिरेकाभ्यां पूर्वक्षणे स्वेतरसकलकारणसत्त्वे यदसत्त्वे अग्रिमक्षणे कार्यव्यतिरेकस्तत्त्वस्यैव कारणतारूपत्वाच्चक्रदण्डादीनामवश्यं कारणत्वमित्युच्यते तदोक्तनिश्चयसामग्र्यभावेपि तत्तुल्यम् ।

---

रजतमिति भ्रमरूपकार्यकाले न सत्त्वमिति न कार्यकालवृत्तित्वविशिष्टो बाधनिश्चय इत्येतावतैव सामञ्जस्ये बाधनिश्चयसामग्र्यभावस्य कारणत्वकल्पनमफलमिति भावः ।

( १ ) व्याप्यमिति । इदं न रजतमितिबाधनिश्चयाभावात् सामग्रीमत्क्षणोत्तरक्षणो न बाधनिश्चयोत्पत्तिक्षणः तदुत्तरं बाधनिश्चयस्यैव सत्त्वादिति न तदा भ्रमोत्पत्त्यापत्तिरिति बाधसामग्र्यभावस्य कारणत्वकल्पने विफलमिति भावः । कार्यवद्देशः-शुक्तिकादिः।

## भावरूपाज्ञानाङ्गीकारे लाघवम् ।

भावरूपाज्ञानाङ्गीकारे तु रजतादिकं प्रति इदन्त्वाद्यवच्छिन्नाश्रयताकत्वे सति रजतादिभेदाद्यवच्छिन्नविषयताकाज्ञानत्वेन ऐक्यसम्बन्धेन हेतुत्वम् , अज्ञानत्वञ्च जातिविशेषो न जानामीत्यनुगतप्रतीत्योक्त हेतुतावच्छेदकत्वादिना च सिद्धः , यदा च -इदं न रजतमित्यादिबाधनिश्चयस्तदा तदभिभाव्यस्योक्ताज्ञानस्यैवाभावात् न रजताद्युत्पत्त्यापत्तिः यदा चोक्तनिश्चयो न जातः जातोऽपि चाप्रामाण्यज्ञानाद्यास्कन्दितस्तदा रजतभेदं न जानामीति तादृशाज्ञानानुभवात् तादृशाज्ञानाङ्गी(१)कारात् रजताद्युत्पत्तिः एवञ्चाप्रामाण्यज्ञानाभावनिश्चयत्वादीनां निवेशेनानन्तहेतुत्वस्य तादृशसामग्र्यभावहेतुत्वस्य चाकल्पनान् महदेव लाघवम् ।

ननु बाधनिश्चयस्य अज्ञानध्वंसरूपस्योत्पत्तिकाले रजताद्युत्पत्तेरापत्तिः ज्ञानस्याज्ञानध्वंसत्वपक्षे पूर्वक्षणे(२)अज्ञानसत्त्वाज्ज्ञानस्याज्ञाननाशकत्वपक्षे बाधनिश्चयोत्पत्तिक्षणेपि तत्सत्त्वात् नचाज्ञानध्वंसो बाधनिश्चय इति पक्षे (३)तदुत्पत्तिक्षणे समवायिकारणस्याज्ञानस्याभावात् कुत्र कार्यमापाद्यमिति वाच्यम् , तत्क्षणे अज्ञानस्याभावेऽप्यज्ञानरूपदेशावच्छेदेन कारणकूटवान् यः क्षणस्तदुत्तरक्षणनिष्ठकार्योत्पत्तेरज्ञानावच्छिन्नत्वापादने बाधकाभावादिति चेन्न—

---

( १ ) तादृशाज्ञानेति। इदन्त्वावच्छिन्नाश्रयताकत्वे सति रजतभेदावच्छिन्नविषयताकाज्ञानेत्यर्थः ।

( २ )पूर्वक्षण इति। ध्वंसं प्रति प्रतियोगिनः कारणत्वादितिभावः।

( ३ ) पक्ष इति । उत्पन्नं हि ज्ञानमज्ञाननाशकमिति भावः ।

कपालादेर्ध्वंसोत्पत्तिक्षणे तत्र घटाद्युत्पत्तिवारणाय जन्यसत्त्वावच्छिन्नं प्रति प्रतियोगितास्वाव्यवहितपूर्वत्वश्चेत्युभयसम्बन्धेनाखण्डोपाधिविशेषरूपेण ध्वंसत्वेन(१) प्रतिबन्धकत्वकल्पनात्तत एवोक्तापत्तिवारणात्, परैरप्युक्तापत्तिवारणायोक्तहेतुत्वस्यावश्यं वाच्यत्वात्। परेषां सत्त्वं द्रव्यगुणकर्मसु कार्यता च समवायेन अस्माकन्तु सत्त्वं दृश्यमात्रे कार्यता च तादात्म्येनेत्येतावन्मात्रभेदात् बाधनिश्चयस्याज्ञाननाशकत्वपक्षे तु तृतीयक्षणसाधारणमव्यवहितपूर्वत्वं (२) निवेश्यम्।

## अभावरूपाज्ञानपक्षेऽपि लाघवशङ्का।

अथैवमव्यवहितपूर्वत्वसम्बन्धेन यो बाधनिश्चयस्याभावः विशेषणतासम्बन्धेन तद्विशिष्टो यो बाधनिश्चयाभावस्तत्त्वेनैव हेतुत्वसंभवान्मन्मतेऽपि बाधसामग्र्यभावस्य न हेतुत्वम् (३) अगृहीताप्रामाण्यकानाहार्यत्वादिना च न बाधनिश्चयस्य विरोधित्वं किन्तु तत्त्वेनैव निश्चयत्वस्याव्याप्यवृत्तिजातित्वमङ्गीकृत्याहार्यगृहीताप्रामाण्यकादि-

---

(१) ध्वंसत्वेनेति। तथा च कपालध्वंसोत्पत्तिक्षणे उभयसम्बन्धेन ध्वंसस्य सत्त्वान्न घटोत्पत्तिरित्यर्थः।

(२) तृतीयक्षणसाधारणमव्यवहितोत्तरत्वं च स्वसमयध्वंसाधिकरणसमयध्वंसाधिकरणसमयध्वंसानधिकरणत्वे सति स्वसमयध्वंसाधिकरणत्वम्।

(३) हेतुत्वमिति। तथा च बाधनिश्चयोत्पत्तिक्षणे अव्यवहितपूर्वत्वसम्बन्धेन बाधनिश्चय एव वर्तते न तु अव्यवहितपूर्वत्वसम्बन्धावच्छिन्नप्रतियोगिताका बाधनिश्चयाभावः इति विशेषणतासम्बन्धेन तद्विशिष्टबाधनिश्चयाभावस्यासत्त्वान्न तदानीं भ्रमोत्पाद इति बाधनिश्चयसामग्र्यभावस्य कारणत्वकल्पनं व्यर्थमिति भावः।

ज्ञानेषु तदनङ्गीकारेण तेषामविरोधित्वोपपत्तेस्तथा च किं भावरूपाज्ञानकल्पनयेति चेन्न,

## अभावरूपाज्ञानपक्षे महागौरवप्रदर्शनम् ।

उक्तरीत्यामपि महागौरवात् । तथा हि—अज्ञानत्वजात्यपेक्षया(१) निश्चयत्वावच्छिन्नसमवायावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन निश्चयविशिष्टाभावत्वं गुरुतरम् , उक्तसम्बन्धेन ध्वंसाभवापेक्षया च निश्चयस्य स्वविषयविशेषितस्याभावो गुरुतरः, अव्यवहितपूर्वत्वश्च स्वसमानाधिकरण्यं—स्ववृत्तिकृतिवृत्तित्वश्चेत्युभयसम्बन्धरूपं, तत्र कृतेः स्ववृत्तित्वं कालिकं कालिकसम्बन्धेन स्वप्रागभाववत्त्वञ्चेत्युभयसम्बन्धेन कृतिवृत्तित्वं च कालिकेनेति त्वया वाच्यम् मम तु स्ववृत्तिकृतिवृत्तित्वं स्ववृत्तिकृतिमत्कृतिवृत्तित्वं वा अव्यवहितपूर्वत्वं वृत्तिः कृतिमत्ता च कालिकेनैव—स्वप्रागभावासमानकालीने स्वासमानाधिकरणे च स्वप्रतियोगिताविरहेण (कृतौ) कालिकावच्छिन्नस्वप्रागभाववत्त्वस्य सामानाधिकरण्यस्य च निष्फलत्वात् तथा चाव्यवहितपूर्वत्वमपि ते गुरुतरम्(२) ।

निश्चिनोमीतिप्रत्ययस्य प्रमात्वजात्यैवोपपत्तेः संशयस्य च प्रमात्वानङ्गीकारात् निश्चयत्वजातावपि मानाभावः गृहीताभा-

(१) अज्ञानत्वजात्यपेक्षयेति। मम रजतं प्रति अज्ञानं कारणं तव तु रजतभ्रमं प्रति बाधनिश्चयाभावः कारणमिति गौरवमिति भावः।

(२) गुरुतरमिति। तथा च अथैवमित्यादिनोक्तोऽव्यवहितपूर्वत्वसम्बन्धेन बाधनिश्चयस्याभावः गुरुतर इति भावः ।

माण्यकादिवृत्ताविव भ्रमरूपायां वृत्तौ निश्चयत्वानङ्गीकारेपि क्षति-विरहात्, प्रातिभासिकप्रमात्वेनैव तस्यां निश्चयत्वधीसंभवात्— इदं रजतमित्यादिभ्रमं प्रति बाधाभावादिनिष्ठजनकतायां परम्पर-यावच्छेदकत्वेन तादृशजातिकल्पनापेक्षया(१) तादृशकारणतास्था-नीयकारणत्वे साक्षादवच्छेदकतया वैजात्यविशेषस्यैव(२) कल्प-यितुमुचितत्वेन क्लृप्तसन्निकर्षादिषु तदाश्रयत्वकल्पने विनिगमका-भावेन (च) तदाश्रयत्वेनाज्ञानस्यैव कल्पनौचित्यात् बाधसामग्र्यादिप्र-तिबन्धकत्वाकल्पनेनोपदर्शितलाघवानुग्रहात्, प्रमात्मकबाधनिश्चया-भावनियतसन्निकर्षादेरेव जातिविशेषेण शक्तिविशेषेण वा हेतुत्वसं-भवात्(३), अनुमित्यादौ परामर्शादिकारणत्वस्थलेपि (विशिष्ट) व्याप्यपक्षवैशिष्ट्याद्यज्ञानाभावस्योक्तवैशिष्ट्यविषयक(प्रमात्वावच्छि-न्नस्यैव)धूमालोकादिपरामर्शनिष्ठशक्तिविशेषावच्छिन्नस्यैव वा हेतु-त्वसंभवादतिरिक्तनिश्चयत्वकल्पने प्रयोजनाभावात्।

न च शक्तिविशेष एव निश्चयत्वमिति वाच्यम्, अनुमित्यनु-पधायकपरामर्शे शक्तिविशेषसत्त्वे मानाभावान्निश्चयत्वस्य व्यवहाराच्च।

नचाज्ञानस्य चिदाश्रयत्वविषयत्वयोः (४)कदाचिदेवेदंत्वविशि-

---

(१) तादृशजाति—निश्चयत्वेत्यर्थः।

(२) वैजात्येति। भावरूपाज्ञानवृत्त्यज्ञानत्वजातीत्यर्थः।

(३) हेतुत्वसम्भवादिति। तं प्रतीति शेषः।

(४) चिदाश्रयत्वेति। आश्रयत्वविषयत्वभागिनी निर्विभाग-चितिरेव केवलेति संक्षेपशारीरकोक्त्या अज्ञानस्य आश्रयता विषयता च चिति एवेत्यर्थः।

ष्टरजतभेदाद्यवच्छेदकं कदाचिच्च विद्यमानमपि तत्तयोर्नावच्छेदकमिति कल्पनमसमञ्जसमिति वाच्यम्, त्वन्मतेपि नित्यस्य बाधनिश्चयाभावस्यात्मसम्बन्धे तत्तच्छरीरावच्छिन्नत्वस्य कादाचित्कस्यावश्यंवाच्यत्वात् अन्यथा बाधनिश्चये सत्यपि तदभावसत्त्वापत्त्या भ्र(प्र)माद्यापत्तेः।

अथ तत्तत्कालवृत्तिविशेषणतयोक्ताभावो(१) हेतुः विशेषणतामात्रन्तूक्ताभावस्यात्मनि सार्वदिकमिति चेन्न, सम्बन्धाननुगमेनानन्तहेतुत्वापत्तेस्तत्तत्कालत्वेनैव हेतुतापत्तेश्च, सम्बन्धाननुगमस्यादोषत्वे प्रकाराननुगमस्याप्यदोषत्वापत्तेः अन्यथा (२)परिभाषामात्रत्वापत्तेः ।

पार्थिवपरमाणुगतायां रूपाद्यभावाश्रयतायां कालविशेषावच्छिन्नत्वस्य गगनादिगतायां शब्दविशेषाद्यभावश्रयतायां कर्णभेर्याद्यवच्छिन्नत्वस्य च परैरपि कल्पनात्(३) ।

## रजतस्याज्ञानकार्यत्वे लाघवम् ।

किञ्च भ्रमस्थले बाधाभावस्य हेतुत्वे तत्कार्यता—इदं रजतमित्याकारकचाक्षुषत्वादिना वाच्या उक्तरूपेणाज्ञानस्य हेतुत्वे तु

---

(१) हेतुरिति । तत्तत्कालीनं तत्तद्भूतलादिकं तत्तदभावानां सम्बन्धः अत एव घटाभावस्य नित्यत्वेऽपि घटकाले न घटात्यन्ताभावबुद्धिः घटकालस्य सम्बन्धाघटकत्वादिति रीत्या बाधनिश्चयकाले नात्मनि तदभाव इति भावः ।

(२) अन्यथेति । सम्बन्धाननुगमो न दोषाय प्रकाराननुगमस्तु दोषाय इति परिभाषमात्रं स्यान्न तु यौक्तिकमिति भावः ।

(३) कल्पनादिति । तथा च अज्ञानस्य चिदाश्रयत्वविषयत्वयोरवच्छेदकं रजतभेदादिकं कालविशेषेणैव स्यादिति भावः ।

तत्कार्यता प्रातीतिकरजत्वादिनैवेत्यपि महालाघवम् ।

अथैक्यमुक्ताकारनियमो भ्रमे कथमिति चेच्छृणु यद्यप्युक्तरूपेणाज्ञानस्यैक्येन हेतुत्वं तादात्म्येनोक्तरजतत्वादिनैव कार्यत्वं तथापीदमाद्यैक्यचित्सम्बन्धावच्छेदेनाध्यासिकसम्बन्धेन चिदाश्रिताज्ञानपरिणामस्य रजतादेस्तादृशाज्ञानतादात्म्यादेवोक्तचित्सम्बन्धावच्छेदेन आध्यासिकसम्बन्धेन चिदाश्रितत्वोपपत्त्या भ्रमरूपाया वृत्तेस्तादृशरजताद्यवच्छिन्नत्वेनोक्ताकारनियमोपपत्तेः, यदवच्छेदेनाध्यासिकसम्बन्धेन चिदाश्रिताज्ञानपरिणामो यद्रजतादिकं तत् तदवच्छेदेनाध्यासिकसम्बन्धेन चिदाश्रितमिति नियमात् ।

अथ रजतादिनिष्ठायाः साक्षिभास्यत्वीयप्रकारताया इदन्त्वाद्यवच्छिन्नविशेष्यतावच्छिन्नैक्यादिसंसर्गतावच्छिन्नत्वं कथमिति चेत्, आध्यासिकस्य चिच्चेत्यतादात्म्यसम्बन्धस्यैव विषयतापरनामकत्वात्(१), तस्य च रजतभेदाद्यज्ञानचित्सम्बन्धरूपस्येदमाद्यैक्यचितोः सम्बन्धावच्छेदेन तादृशसम्बन्धरूपस्य चेदमादिचितोः सम्बन्धाव-

---

(१) विषयतापरेति । ननु वृत्तिज्ञानीयसम्बन्धानां विषयनिष्ठानां विशेष्यतादिरूपत्वस्य अवश्यं वाच्यतया तैरेव विषयतानिर्वाहे चिच्चेत्यसम्बन्धानां विषयतात्वकल्पने मानाभाव इति चेन्न—'अहं सुखी'त्यादौ वृत्तिज्ञानीयसम्बन्धेन सुखादौ विषयताव्यवहारासम्भवात् सुखादौ साक्षिमात्रभास्यत्वेन वृत्त्यस्वीकारात् तत्र सुखादिचित्सम्बन्धस्यैव सुखादिविषयतात्वेन क्लृप्ततया चित्सम्बन्धस्यैव सर्वत्र विषयतात्वस्वीकारात् ज्ञानज्ञेयसम्बन्धस्यैव व्यवहारविषयत्वात् वृत्तेर्ज्ञानव्यञ्जकत्वेऽपि ज्ञानत्वाभावात् ।

च्छेदेन तादृशसम्बन्धरूपस्य चेदन्त्वादि(सम्बन्ध)चितोः सम्बन्धावच्छेदेन तादृशसम्बन्धरूपस्य चेदन्त्वादिचितोः सम्बन्धावच्छेदेन स्वीकारात्, तेषु च सम्बन्धेषु प्रकारतासंसर्गताविशेष्यतावच्छेदकतात्वरूपाणां वैलक्षण्यानामनुभवबलादेव व्यवस्थितत्वात्परैर(१)पि तेषामनुभवबलादेव व्यवस्थितत्वाङ्गीकारात् , परस्परावच्छिन्नतावद्विषयताशालिसाक्षिज्ञानव्यवहारोपपत्तेः ।

अथ रङ्गाद्यवच्छिन्नाश्रयताकाद्रजतान्यत्वव्याप्यशुक्तित्वाद्य-

---

( १ ) परैरिति । तार्किकैरित्यर्थः । रजतत्वेनेदं जानामि रजतत्वसमवायेनेदं जानामि रजततादात्म्येनेदं जानामि इत्यनुभवेन प्रकारतासंसर्गविषयतावच्छेदकत्वेन विशेष्यत्वावगहनादितिभावः एवञ्च अय मत्रनिष्कर्षः यश्चिच्चेत्यसम्बन्ध एव विषयता विषतात्वमखण्डधर्मस्तस्यां स्वीक्रियते एकविषयतादिविशिष्टापरविषयतायामवच्छेदकविषयता विशेष्यता तादृशविशेष्यतायामवच्छेदकविषयता विशेष्यतावच्छेदकताशब्देन व्यवह्रियते ततश्च विशेष्यतात्वप्रकारतात्वसांसर्गिकविषयतात्वविशेष्यताप्रकारतावच्छेदकतात्वानामखण्डधर्माणां स्वीकारस्तार्किकाणामयुक्तः इदंविषयतावच्छिन्ना या रजतविषयता तद्विशिष्टा या तादात्म्यविषयता तच्छालिप्रत्यक्षत्वेन इदं रजतमित्याकारकप्रत्यक्षस्य प्रवृत्तिहेतुत्वस्य अखण्डविषयतात्वधर्ममादायैवोपपत्तेः । अयमभिप्रायः इदंविषयता तादात्म्यविषयताविशिष्टायां रजतविषयतायामवच्छेदिका मूलादिकमिव संयोगविशिष्टविहगादौ तादृशावच्छेकत्वे इदन्त्वविषयतावच्छेदिका मूलादिनिष्ठावच्छेदकत्वे मूलत्वादिकमिव एवमिदंविषयतानिष्ठावच्छेदकत्वे निरूपकत्वं यत् तादात्म्यादिविषयतानिष्ठं तदवच्छेदकत्वं तादात्म्यत्वादिविषयतासु स्वीक्रियते संयोगत्वादाविव मूलादिनिष्ठावच्छेदकानिरूपकत्वमिति ।

च्छिन्नविषयताकाद्वा अज्ञानात्तत्र तदात्म्येन रजताद्युदयात् शुक्त्यवच्छिन्नाश्रयताकरजतभेदावच्छिन्नविषयताकाज्ञानकार्यत्वं रजतत्वादिनैव न संभवति तादृशाज्ञानविशिष्टरजतत्वादिना तदङ्गीकारे तु विपरीतमेव गौरवमिति चेन्न, अज्ञानान्तरजन्यरजतादिव्यावृत्तजातिविशेषाणामेव तत्तदज्ञानकार्यतावच्छेदकत्वात् , प्रातीतिकरजतं प्रति तदुपधायकाज्ञानानां सर्वेषां शक्तिविशेषेण हेतुत्वाद्वा, प्रातितिकत्वञ्च—जातिविशेषः बाधाभावे कार्यत्वन्तु न जातिविशेषेण विशिष्टज्ञानविषयतानां मिथोऽवच्छेद्यावच्छेदकभावासिद्ध्यापत्तेः ।

अत एव यदवच्छिन्नचैतन्ये व्यावहारिकं प्रतिभासिकं वा यदध्यस्तं तद्विषयतावच्छेदेन तद्विषयताकचैतन्यस्य ईश्वरं प्रत्यनावृतत्वात्तस्य तद्विषयतावच्छिन्नतद्विषयताकसाक्षात्कारित्वं 'यः सर्वज्ञः' इत्यादिश्रुतिसिद्धं संगच्छते, अत एव च जात्याद्यवच्छिन्नचिति व्यक्त्यादेरध्यास इति सिद्धान्तः, अन्यथा—जात्यादिविषयतावच्छिन्नव्यक्त्यादिविषयताकज्ञानासिद्धेः । एवञ्चेदमाद्यैक्यचितोः सम्बन्धावच्छेदेनाज्ञाने चिद्विषयतारूपो दृश्यताव्यवहारनियामक एकः सम्बन्ध उक्तयुक्तिभिः तमेव भान्तमनुभाति सर्वमित्यादिश्रुतिभिश्च सिद्धः, रजतभेदादिचितोः सम्बन्धावच्छेदेन चित्यज्ञानविषयतारूपावृतत्वव्यवहारनियामकोऽन्यः सम्बन्ध उक्तयुक्तिभिरनृतेन हि प्रत्यूढा नीहारेण प्रावृता अज्ञानेनावृतं ज्ञानमित्यादिश्रुतिस्मृतिभिश्च सिद्ध इति रजताद्युपदानाज्ञानस्य मिथोविलक्षणसम्बन्धद्वये विप्रतिपत्तिः सुदूरनिरस्ता ।

किञ्चैतेन इदंनिष्ठरजतभेदादिचितोः सम्बन्धावच्छेदेन अज्ञा-

नचितोरेक एव सम्बन्धोऽङ्गीक्रियताम् , अथवा ज्ञानस्येवाज्ञानस्यापि तादृशभेदादावेव विशिष्टविषयता अङ्गीक्रियतां किंचित्यज्ञानस्योक्तसम्बन्धद्वयेनाहंकारावच्छेदेन चित्सम्बन्धस्यावश्यकतया तत एवाज्ञानस्य साक्षिभास्यत्वसम्भवादित्यादिकं परास्तं तादृशभेदादिचित्सम्बन्धावच्छेदेन चित्येकस्यैवाज्ञानसम्बन्धस्याङ्गीकारे हि तत्परिणामरजतादेरपि तदवच्छेदेनैव चित्सम्बन्धापत्त्येदंनिष्ठरजतभेदवद्रजतमित्यादिरेव भ्रमाकारः स्यात् नत्विदं रजतमित्यादिः, तादृशभेदविषयतावाच्छिन्नरजतादिविषयताकत्वेन ज्ञानं व्यवह्रियेत न त्विदमैक्यमात्रविषयतावच्छिन्नरजतादिविषयताकत्वेन ज्ञानं व्यवह्रियेत एवमिदं न जानामीतिवद्रज्जतभिन्नं न जानामीति व्यवहारः स्यादिदंत्वविशिष्टस्य रजतभेदस्य च द्वयोरेकजातीयेऽज्ञानचित्सम्बन्धेऽवच्छेदकत्वाविशेषात् ।

अथ ज्ञानस्येवेत्यादिकल्पे नायं दोषः विशिष्टविषयता हीदन्त्वावच्छिन्नोद्देश्यतावच्छिन्नारजतभेदत्वावच्छिन्ना विधेयता तथा चोद्देश्यविशेषिततयाऽज्ञानं व्यवह्रियेत न तु विधेयविशेषिततयेति-चेन्न, रजतभेदादिनिष्ठस्याज्ञानसम्बन्धस्य विधेयतात्वे इदमादिनिनिष्ठस्याज्ञानसम्बन्धस्योद्देश्यतात्वे च मानाभावात् ।

अथेदमाद्यविशेषिते रजतभेदादावेव विशिष्टविषयतेति चेन्न चेत्यमात्रे चित्सम्बन्धस्य क्लृप्तत्वेनोक्तचिच्चेत्यसम्बन्धद्वयावच्छेदेनाज्ञानचितोः सम्बन्धद्वयमात्रकल्पनयोपपत्तावुक्तभेदादिघटकेष्वनन्तपदार्थेष्वनन्तानामज्ञानविषयतानामवच्छेद्यावच्छेदकभावापन्नानामङ्गीकारे गौरवमुक्तभेदादिविषयकाज्ञानजन्यस्य रजतादेस्तादृशविषय-

कत्वं स्यान्न तु—इदमैक्यादिविषयतावच्छिन्नरजतादिविषयताकत्वं रजताद्यवच्छिन्नचितः स्यात् ।

अथ सिद्धान्तेपि रजतभेदावच्छिन्नचिद्विषयताकत्वमज्ञानगतं रजतस्य किं न स्यादितिचेत्स्यादेव, कुतो नानुभूयते इति चेत् चितो रजतेभेदसम्बन्धस्यावृतत्वात् ।

अथ ममाप्युक्तभेदस्याज्ञानविषयत्वरूपावृत्वात्तत्तद्विषयकत्वं रजते नानुभूयते इति चेत्तथापि [न त्विदमैक्यादिविषयतावच्छिन्नरजतादिविषयताकत्वमिति] द्वितीयापत्तिःस्थितैव ।

अथाज्ञानस्य तथात्वेऽपि तथाविधाज्ञानकार्यत्वस्येदमैक्याद्यवच्छिन्नरजतत्वादिनाऽङ्गीकारात् रजतादिचैतन्यस्य तादृशविषयताकत्वसिद्धिरिति चेत्तर्हिगौरवमेव महन्मूर्ध्नि स्वकीये पातितं त्वया ।

यत्त्विदमैक्यादिचितोः सम्बन्धावच्छेन रजतभेदादेरेवाज्ञानविषयत्वमात्रमस्तु—चित्यज्ञानस्योक्तसम्बन्धाभ्यां कृतमिति,

तत्तुच्छमुक्तभेदादिनिष्ठस्याज्ञानविषयत्वस्योक्तसम्बन्धावच्छिन्नत्वासम्भवादवच्छेद्याधिकरणे साक्षात्सम्बन्धस्यैवावच्छेदकत्वात् , रजतादिचैतन्यस्योक्तविषयकत्वानिर्वाहाच्च एवञ्च गगनादितादात्म्यादिचित्सम्बन्धावच्छेदेन नैल्यादिचित्सम्बन्धाङ्गीकारेपि तादृशतादात्म्यादेर्नैल्यादिप्रतियोगिकत्वाभावात् , तादात्म्येन नैल्याद्युत्पत्तौ क्लृप्तायाः अवयवनैल्यादिपाकादिसामग्र्या अभावेपि गगनं नीलमित्यादिभ्रमस्थले नैल्यद्युत्पत्तिस्वीकारो निराबाध एव ।

किं चैतेन जपाकुसुमादिसन्निहितस्फटिकादौ लौहित्यादिभ्रमस्थले चक्षुरादिसंप्रयुक्तलौहित्यादेरनुभूयमानस्य स्फटिकाज्ञानान्य-

थाख्यातिरिति वदन्तः (१)सुदूरपराहताः, उक्तरीत्या (२)लौहित्यादावज्ञानहेतुकत्वावश्यकत्वेन तादृशाज्ञानस्य च स्फटिकादितादात्म्यावच्छेदेन चित्सम्बद्धत्वात्तत्परिणामलौहित्यादेरपि तथात्वावश्यकत्वात्, अन्यथा लौहित्यादिचिद्विषयतायास्तादृशतादात्म्य(चिद्वि)विषयतावच्छिन्नत्वाद्यनुपपत्तेः ।

न च स्फटिकादौ लौहित्याद्यभावधीकालेपि लौहित्यादिभ्रमस्य जायमानस्योक्ताभावाज्ञानजन्यत्वानुपपत्तिः तदा तादृशाज्ञानस्योक्तधिया निवर्त्तितत्वादिति वाच्यम्, जपाकुसुमाद्युपाधिसंनिधानेन प्रतिबन्धात्तया (३)तदनिवृत्तेः, तार्किकादिमते तु तत्र बाधाभावस्य हेतुत्वासम्भवेपि जपादिसंनिधानस्यैवोक्तविशेष्यतावच्छिन्नप्रकारताशालिबुद्धित्वावच्छिन्नं प्रति हेतुत्वमवश्यं वाच्यमन्यथोक्तबुद्धेरुक्तप्रकारत्वस्याकस्मिकत्वापत्तेस्तथा च गौरवम्, गुणः संयोगेन द्रव्यवान्

---

(१) वदन्त इति । वेदान्तपरिभाषाकारादय इत्यर्थः–इत्थं हि तदीयो ग्रन्थः 'यत्रारोप्यमसन्निकृष्टं तत्रैव प्रातिभासिकवस्तूत्पत्तेरङ्गीकारात् अत एवेन्द्रियसन्निकृष्टतया जपाकुसुमादिगतलौहित्यस्य स्फटिके भानसम्भवात् न स्फटिकेऽनिर्वचनीयलौहित्योत्पत्तिः' इति ।

(२) उक्तरीत्येति । लौहित्योत्पत्तौ क्लृप्ताया अवयवलौहित्यपाकादिसामग्र्या अभावेऽपि लौहित्योत्पत्तेः गगनं नीलमित्यत्र नीलोत्पत्तेरिव अज्ञानहेतुकत्वस्य अवश्यस्वीकर्तव्यतयेत्यर्थः ।

(३) तया–स्फटिकादौ लौहित्याभावधिया । तदनिवृत्तेः लौहित्याज्ञानाभावस्यानिवृत्तेः ।

जातिमान् वेत्यादिभ्रमस्थले तु गुणाद्यनुयोगिकत्वं द्रव्यादिप्रतियोगिकत्वं चेत्युभयचित्सम्बन्धावच्छेदेन संयोगाद्युपादानाज्ञानचित्सम्बन्धाङ्गीकारात्तादृशाज्ञानचित्सम्बन्धस्य च सांसर्गिकविषयतात्वाङ्गीकारान्नानुपपत्तिः, संयोगादिविषयतायां च तादृशप्रतियोगिकत्वादिविषयतावच्छिन्नत्वमिष्टत्वान्नापादनीयम्, अथवा गुणादेर्द्रव्यादेश्च चित्सम्बन्धावच्छेदेनैव तादृशाज्ञानस्य चिति सम्बन्धाङ्गीकारात् तादृशगुणादिचित्सम्बन्धे विशेष्यतात्वस्य तादृशद्रव्यादिचित्सम्बन्धे च प्रकारतात्वस्य स्वीकारादविरोधः ।

एतेन तादृशभ्रमस्थले गुणाद्यनुयोगिकसंयोगाद्यप्रसिद्ध्या तच्चित्सम्बन्धस्याज्ञानचित्सम्बन्धावच्छेदकत्वासम्भवः संयोगादेर्द्रव्यादेश्च तत्रोत्पत्तिस्वीकारे गौरवमित्यादिकं परास्तम्, ह्रदो वह्निमानित्याद्याकारकानुमित्याद्याभासरूपभ्रमस्थले तु परमते यथा वर्त्तमानवह्न्या(१)दिनिष्ठविषयतावच्छिन्नातीतानागतह्रदादिविषयतानिरूपकत्वमनुमित्यादौ स्वीक्रियते तथास्माकमप्यतीतानागतह्रदादिसंयोगादिचितोः सम्बन्धावच्छेदेनाज्ञानचितोः सम्बन्धस्य सम्भवात् मन्मतेऽतीतानागतह्रदादेर्वर्तमानसूक्ष्मावस्थास्वीकारात्तदीयचित्सम्बन्धस्यैवाज्ञानचित्सम्बन्धावच्छेदकत्वसम्भवाच्च तादृशाज्ञानपरिणामवह्न्यादेरपि तादृशसम्बन्धसम्भवः, अतो न भिन्नकालीनयोरवच्छेदकत्वासम्भवप्रयुक्तो दोषः ।

---

(१) वर्तमानवह्नीत्यस्य स्थाने ख. पु. अतीतानगतवह्नीति पाठः ।

## रजतस्मरणानुपपत्तिशङ्का ।

ननु (१)भ्रमविषयीभूतरजतादौ चाक्षुषानुमित्यादिवृत्त्यभावाद् वृत्तिसूक्ष्मपरिणामरूपसंस्काराभावेन तादृशरजतादिस्मरणानुपपत्तिः– न च चाक्षुषादिवृत्तिरेव तत्र जायते चक्षुः संयोगादिसामग्रीसत्त्वादिति वाच्यम् , प्रमात्वजात्यवच्छिन्नं प्रत्येवान्तःकरणस्य परिणामित्वाङ्गीकारेणाप्रमावृत्तेरन्तःकरणपरिणामचाक्षुषत्वाद्यसम्भवात् , अज्ञानप्रमयोरेकावच्छेदेन चिद्विषयतानियमाय स्वविषयतावच्छेदकत्वसम्बन्धेन प्रमां प्रति तेन सम्बन्धेनाज्ञानस्य हेतुताकल्पनात् , अज्ञानचिद्विषयतानवच्छेदकेन शुक्तिरजतचित्सम्बन्धेन प्रमाचिद्विषयताया अवच्छेत्तुमशक्यत्वात् ।

अथैवं रजतचाक्षुषं मे जातं (रजतं) पश्यामीत्यादिव्यवहारो न स्यादिति चेन्न, इदमाकारचाक्षुषाभिव्यक्तचिदध्यस्तत्वेन रजतादौ(२) तथा व्यवहारात् ।

---

(१) नन्विति । भ्रमविषयरजतादेरनावृतत्वेऽपि अस्वच्छत्वेन अविद्यावृत्त्या चैतन्यस्य रजताकारत्वेन वेद्यत्वम् । चिदुपरागार्थमविद्यावृत्तेरावश्यकत्वादिति रजतादौ न चाक्षुषादिवृत्तिरिति भावः ।

(२) रजतादाविति । अयमभिसंधिः 'इदं रजतम्' इत्यादौ सर्वत्र भ्रमे ह्याकारतादर्शनात् इदमादिसम्बन्धावच्छेदेन रजतादिसम्बन्धस्य च प्रत्ययेन तदुभयमध्यस्तम् तत्र रजादे सम्बन्ध इव स्वरूप मध्यस्तम् इदं रजतं नेति प्रत्ययेन विनिगमकाभावात् द्वयोरपि बाध्यत्वम् इदमादेस्तु सम्बन्ध एवाध्यस्तः न स्वरूपम् रजतमिदं नेति बाधेन संसर्गस्यैव बाध्यमानत्वात् तादृशबाधोत्तरमपि हि 'एतत्संसृष्टतः

अथ तथापीदं रजतमित्यादिभ्रमस्याचाक्षुषतायां नेदं रजतमित्यादिचाक्षुषविरोधित्वं न स्यात् , चाक्षुषस्यैव बाधविधया तद्विरोधित्वादिति चेन्न—तादृशभ्रमकाले शुक्त्यादिनीलपृष्ठावच्छिन्नचक्षुःसंप्रयोगादिरूपस्य व्यञ्जकस्याभावेन शुक्तित्वादेरिव रजतभेदादेरप्यचाक्षुषत्वोपपत्तेः(१), शक्तिविशेषेण दोषाणामेव प्रतिबन्धकत्वस्य चक्षुरादिसम्प्रयोगे कारणत्वस्य वा कल्पनयोपपत्तिसम्भवाच्च तादृशशक्तेश्च वस्तुगत्या तादृशचाक्षुषस्य यस्मान्नोत्पत्तिरुत्पत्तिर्वा तत्रैव स्वीकर्त्तुं शक्यत्वात् ।

अथापि जाग्रद्भ्रमस्थले कथञ्चिद्रजतादौ चाक्षुषादिवृत्तिरुच्यतां स्वप्नभ्रमविषये तु चक्षुरादेरुपरतत्वेन तदसम्भवात्केवलेन मनसा प्रमाया अजननात्सुखादेः साक्षिमात्रवेद्यत्वात्संस्कारस्यानुपपत्तिरेव ।

एतेन यद्वृत्त्यवच्छिन्नचिद्भास्या यावन्तोऽर्थास्तद्वृत्तिसूक्ष्मावस्थैव तावतां संस्कारः तथा चेदं रजतमित्यादिभ्रमस्थले इदमाद्याकारचाक्षुषवृत्तिसूक्ष्मावस्थैवेदमादेरिव रजतादेरपि संस्कार इत्यपि परास्तम् , स्वाप्नभ्रमस्थले वृत्तिसामान्याभावात् ।

---

था रजतं ज्ञातम्' इत्यङ्गुल्या निर्दिश्यमानत्वात् यथाहुः 'इदमर्थवस्त्वपि भवेद्रजते परिकल्पितं रजतवस्त्विदमि । रजतभ्रमेऽस्य च परिस्फुरणान्न यदि स्फुरेन्न खलु शुक्तिरिव ॥ अभ्यस्तमेव हि स्फुरति भ्रमेषु नान्यत्कथंचन परिस्फुरति भ्रमेषु । रज्जुत्वशुक्तिशकलत्वमरुक्षितित्वचन्द्रैकताप्रभृतिकानुपलम्भनेन ॥ इति संक्षेपशारीरककारपादाः ।

(१) उपपत्तेरिति । तथा च 'नेदं रजतम्' इति बाधोऽपि न चाक्षुष इति भावः ।

अथोक्तरीत्या जाग्रद्भ्रमस्थले संस्कारनिर्वाहेऽपि स्वाप्नभ्रमस्थले तदनिर्वाहात्तत्र भ्रमविषये वृत्तिपरिणामो जायत इत्युच्यते तर्हि स्वप्नभ्रमस्थले क्लृप्तवक्ष्यमाणसामग्र्या जाग्रद्भ्रमस्थलेऽपि वृत्तिसम्भवादुक्तकल्पना व्यर्था, यदवच्छिन्नचैतन्ये यद्भासते तत्सूक्ष्मावस्थाया एव तावत्संस्कारत्वस्य वक्तुं (शक्यत्वेन भ्रमविषयसूक्ष्मावस्था एवतत्सं) ( शक्यत्वं न भ्रमविषय सूक्ष्मावस्थाया एतत्सं ) स्कारत्वसम्भवात्सुषुप्तौ सूक्ष्ममनोवच्छिन्नचिद्भास्याविद्यादेः सूक्ष्ममनोनाशरूपमनःस्थूलावस्थारूपसंस्कारेण जागरे स्मृतिसम्भवात्स्वप्नादिस्थलेऽपि वृत्तिकल्पनानौचित्यात् , इदमाद्याकारवृत्तेरिव रजतादेः सूक्ष्मावस्थाया एव तत्संस्कारत्वे बाधकाभावाद्रजताद्यविषयकत्वस्य तयोस्तुल्यत्वादिति चेद्—

## रजतस्मरणोपपादनम् ।

अत्र वदन्ति स्मृतिजनकसंस्कारोद्बोधकत्वेन ये क्लृप्तास्तेषामेवाननुगतानां शक्तिविशेषेणानुगतानां वा स्मृतिहेतुत्वसम्भवेन संस्कार एव मानस्याभावः ।

अथानुभूतमेव स्मर्यते नान्यदित्यन्वयव्यतिरेकाभ्यामनुभवस्य हेतुत्वे निर्णीते तस्य साक्षादसम्भवाद्व्यापारः(१) कल्प्यः स च चिद्रूपस्यानुभवस्य नित्यत्वात्तदवच्छेदकवृत्तिसूक्ष्मावस्थारूपोऽन्यस्या-

---

( १ ) साक्षाद्व्यापारद्वारा वा कार्याव्यवहितपूर्ववर्तिन एव कारणत्वेन अनुभवस्य नष्टत्वेन व्यापारद्वारैव स्मृत्यव्यवहितपूर्वत्वस्य वाच्यत्वादिति भावः ।

नुगतस्याभावात्स एव च संस्कार इत्युच्यते इति चेन्न अन्वयव्यतिरेकाभ्यामनुभवस्योद्बोधकसमवधानपूर्वत्वनियतत्वेनान्यथासिद्ध(१)त्वादनन्यथासिद्धत्वेपि वा प्रमावृत्तिसूक्ष्मावस्थारूपध्वंस इव भ्रमविषयरजताद्यविद्यापरिणामसूक्ष्मावस्थारूपे ध्वंसेपि संस्कारत्वजात्यङ्गीकारसम्भवेनानुपपत्त्यभावात् युगपदुत्पन्नयोर्वृत्तितदवच्छेदकघटादिनाशयोरैक्येन विषयनाशेपि संस्कारत्वस्य वृत्तौ वृत्त्यन्तरनाशम्विनापि तन्नाशस्यैव तत्संस्कारत्वस्य चावश्यवक्तव्यत्वात्, स्वावरणानवच्छेदकत्वसम्बन्धेन चितं प्रति निरूपकताख्यसम्बन्धविशेषेण संस्कारत्वजात्या कार्यत्वकल्पनात्स्वसामग्रीबलाज्जायमानस्य वृत्तिनाशस्य वृत्तिघटादाविव भ्रमविषये तन्नाशस्यैव संस्कारत्वविशिष्टतया निरूपकत्वसम्बन्धेनोत्पत्तिसम्भवात्, उपेक्षात्मकवृत्तिस्थले आवरणाभिभवानङ्गीकारेणोपेक्षाविरहस्यापि सम्बन्धे निवेशेन वा संस्कारानुपधानात्, आवरणं चासत्त्वापादकाज्ञानविषयत्वं बोध्यम् ।

एतेन सत्यरजतस्थले रजताकारवृत्तिनाशो मिथ्यारजतस्थले चेदमाकार(रजत)वृत्तिनाशो रजतनाशो वा संस्कारो यद्यङ्गीक्रियते तर्ह्यनुगतरूपेण तस्य रजतानुभवव्यापारत्वासम्भव इत्यादिकं परास्तम्, रजतनिरूपितत्वविशिष्टसंस्कारत्वस्योक्तरीत्यानुगतत्वात्, अस्तां वा भ्रमविषयेषु इच्छादिरूपेणेव संस्काररूपेणाप्यन्तःकरणपरिणामः,

---

(१) अन्यथासिद्धत्वादिति । एवं च अनुभवस्य न स्मरणं प्रति कारणत्वं किन्तु उद्बोधकसमवधानस्यैव इति अनुभवस्य कारणत्वोपपत्त्यर्थं न व्यापारकल्पनेति भावः ।

अन्यथा समूलभ्रमबाधे रजतादिसूक्ष्मावस्थाया अपि बाधात् , अग्रे भ्रमविषयरजतादिस्मरणानुपपत्तेः अथवा (१)रजताद्यर्थरूपेणेव भ्रमरूपवृत्तिरूपेणाप्यज्ञानं परिणमते, अन्यथा रजतादेर्भ्रमो जातो नष्टश्चेत्यनुभवस्य दुरुपपादत्वात् ।

नचैवं भ्रमस्थले वृत्तिविषययोर्द्वयोरुत्पत्तिकल्पने गौरवमिति वाच्यम् , फलमुखत्वेनादोषत्वस्योक्तत्वात् तयोर्युगपदुत्पन्नविनष्टत्वेनैकप्रागभावध्वंसप्रतियोगित्वस्यैव स्वीकारात् , एकस्यैव परिणामस्य रजतादिविषयरूपत्वतदाकारवृत्तिरूपत्वयोः संम्भवाच्च, रजतत्वादिभ्रमत्वाभ्यामव्याप्यवृत्तिभ्यां रूपाभ्यामेकस्यापि भेदसम्भवेन विषयविषयित्वसम्भवाच्च, तत्र च भ्रमान्यत् यत्स्वावच्छेदकं तत्तादात्म्यसम्बन्धेन भ्रमत्वेन कार्यत्वमैक्येन भ्रमान्यविशिष्टावस्थाज्ञानत्वेन कारणत्वमवस्थारूपाज्ञानत्वमज्ञानत्वजातिव्याप्यजातिविशेषाज्ञानत्वस्यैव निवेशे घटाद्युपधायके मूलाज्ञाने भ्रमानुपधायके व्यभिचारात्तन्निवेशः, दोषाद्यसमवधानकालेप्यनुभूयमानाज्ञानेन भ्रमानुपधानात् भ्रमान्यविशिष्टेति वैशिष्ट्यं च तादात्म्यं स्वपूर्वत्वं स्ववृत्तिकृतिवृत्तित्वश्चेति त्रितयसम्बन्धेन वृत्तिद्वयं कालिकेन ।

ननु चाकचिक्यदर्शनादिदोषकार्यत्वस्य रजतत्वादिनानाधर्माघटितेन तादृशदोषविशिष्टत्वेनैव लाघवेनावच्छेदाद् भ्रमस्यापि

---

(१) अथवेति । यदाहुर्वेदान्तपरिभाषाकाराः 'प्रमातृचैतन्याभिन्नविषयचैतन्यनिष्ठा शुक्तित्वप्रकारिकाऽविद्या चाकचिक्यादिसादृश्यसंदर्शनसमुद्बोधितरजतसंस्कारसध्रीचीना काचादिदोषसहिता रजतरूपार्थाकारेण रजतज्ञानाभासाकारेण च परिणमते' इति ।

तादृशकार्यतावच्छेदकाक्रान्तत्वात् दोषाद्यसमवधानकाले दोषादिसहकारिविरहात् भ्रमरूपकार्यानुत्पादो व्यभिचारानापादक इति चेन्न, तथासति दोषादिकं विनापि रजतभेदाद्यज्ञानेन रजताद्युत्पादनापत्तेः रजतभेदाद्यज्ञानं विनापि रङ्गभेदाद्यज्ञानसहकारेण दोषादिना स्वविशिष्टस्य रङ्गादेर्जननेन दोषादे रजतभेदाद्यज्ञानव्याप्यसामग्रीत्वासम्भवात्, तस्मात्स्वविशिष्टरजतत्वादिनैव दोषादिकार्यत्वात् व्यभिचारवारणायोक्तविशेषणमावश्यकम्, भ्रमरूपस्वावच्छेदकतादात्म्येन भ्रमान्तरोत्पत्तिवारणाय भ्रमान्येति।

## प्रमाभ्रमयोः स्वतस्त्वपरतस्त्वे।

भ्रमत्वञ्च जातिविशेषो भ्राम्यामीत्याद्यनुगतानुभवादिना सिद्धः। तस्य चान्वयव्यतिरेकाभ्यां दोषजन्यत्वधीव्यङ्ग्यत्वात् परतस्त्वम्। प्रमात्वस्य तु तत्संशयस्थलीयदो (षरूपप्रतिबन्धाभावे) (षे सत्याहृतत्वात्तदभावे) सति साक्षिणैव विषयीकरणात् स्वतस्त्वम्। यद्यपि परोक्षप्रमाया विषयैरतीतानागतैरवच्छेदो न सम्भवति न वा विषयविषयिभावो ज्ञानाज्ञानयोः स्वविषयैस्तदङ्गीकारात्। प्रमाभ्रमवृत्त्योर्ज्ञानत्वाभावात् ज्ञानव्यञ्जकत्वेन (संस्कारादिजनकत्वे) च तत्र ज्ञानपदस्याकरे क्वचित्प्रयुक्तत्वात् तथापि (अ)परोक्षभ्रमस्य स्वोपादानाज्ञानपरिणामीभूतविषयाणां समकालीनत्वात् तैरवच्छेदे बाधकाभावः, स्वावच्छेदकस्थाने स्वनिरूपिकेति वा निवेशनीयम्।

नन्वेवं प्रत्यक्षप्रमाया इव प्रत्यक्षभ्रमस्य विषयावच्छिन्नत्वानुभवविरोध इति वाच्यम्, तादृशानुभवस्य प्रमास्थलेपि परेषामसम्प्रतिपन्न-

त्वादेकाज्ञानोपादानकत्वेन भ्रमतद्विषययोरवच्छेद्यावच्छेदकभावोपसञ्चारसम्भवाच्च । अपरोक्षत्वपरोक्षत्वे तु प्रमाया इव भ्रमस्यापि अनावृतचित्सम्बन्धवद्विषयनिरूपितत्व ( आवृतचित्संबन्धवद्विषयनिरूपितत्व ) रूपे एव अपरोक्षभ्रमविषये इव परोक्षभ्रमविषये भातीतिव्यवहाराभावेनाभानापादकावरणास्वीकारादनुमित्यादाविवेच्छादावपरोक्षत्वपरोक्षत्वव्यवहारेऽपि क्षत्यभावात् ।

अथवोक्तनिरूपितत्वविशिष्टधीत्वरूपे ते, धीत्वं च हीर्धीरित्यादिश्रुत्योक्तमिच्छादिव्यावृत्तमेव कामादीनां पृथगुक्तेः प्रत्यक्षप्रमामात्रनिर्वर्त्याज्ञानजन्यत्वप्रमामात्रनिर्वर्त्याज्ञानजन्यत्वाभ्यां भ्रमे प्रत्यक्षपरोक्षत्वयोर्व्यवहारः तथा च भ्रमसूक्ष्मावस्थैव संस्कारो भ्रमविषये वाच्यः ।

यद्वा निरूपकतासम्बन्धेन भ्रमं प्रति स्वपरिणामाव्यवहितपूर्ववर्त्यज्ञानत्वेन भ्रमान्यस्वपरिणामनिष्ठविषयतासम्बन्धेन हेतुत्वं भिन्नकालीनयोरपि विषयतायाः सम्बन्धत्वाद्रजतादेरुत्पत्तिपूर्वक्षणेऽप्युक्तसम्बन्धेनाज्ञानसत्त्वं रजतादौ सम्भवत्येव ।

ननु समूलस्य भ्रमस्य बाधे तादृशसंस्कारस्यापि बाधात्कथमग्रे स्मृतिरिति चेद्—बाधोत्तरमिदं रजतमासीदित्यादिस्मृतिर्न जायत एव जायमानायाश्चात्र मे रजतभ्रम आसीदित्यादिस्मृतेर्बाधकधीरूपभ्रमत्वग्राहकान्तःकरणपरिणामसूक्ष्मावस्थारूपसंस्कारजन्यत्वान्नानुपपत्तिः।

प्रमाभ्रमवृत्त्योः संस्कारद्वारा स्मृतिजनकत्वानुपपत्तिशङ्का ।

अथ प्रमाभ्रमवृत्तीनां संस्कारद्वारकस्मृतिजनकत्वस्येच्छादिजन-

कत्वस्य चासम्भवः भ्रमस्थले इदमादिप्रमावृत्ते रजताद्यनवगाहित्वा-द्रजतादिभ्रमवृत्तेरिदमाद्यवगाहित्वात्सुखादौ वृत्तिसामान्याभावात् , द्रव्यं रजतमित्यादिप्रमास्थले द्रव्यत्वावच्छिन्नविशेष्यतानिरूपितरजतत्वावच्छिन्नप्रकारताकनिश्चयत्वेन परमते हेतुत्वेपि सिद्धान्ते तदसम्भवः । चित्येकचेत्यसम्बन्धावच्छेदेनापरचेत्याध्यासात् चिच्चेत्यसम्बन्धानामवच्छेद्यावच्छेदकभावाख्यनिरूप्यनिरूपकभावाङ्गीकारेपि निरूपकत्वाख्यवृत्तिविषयसम्बन्धानां तदङ्गीकारे मानाभावात्—

अथ समूहालम्बनाद्विशिष्टवृत्तेर्वैलक्षण्यानुरोधेन समूहालम्बने विशेषणादेः प्रत्येकं निरूपकत्वं विशिष्टवृत्तौ तु विशेषणविशिष्टविशेष्यस्यैव विशिष्टवृत्तिनिरूपकत्वं वा समूहालम्बनवृत्तिनिरूपकत्वव्यावृत्ताखण्डवैलक्षण्यवत् , अत एव विशिष्टवृत्तोनामपि विशेष्ये विशेषणं तत्रापि च विशेषणान्तरं विशिष्टस्य वैशिष्ट्यमित्याद्यवान्तरवैलक्षण्यान्युपपद्यन्ते निरूपकत्वेष्वेव मिथो व्यावृत्तवैलक्षण्यानामङ्गीकारात् , निरूपकत्वाश्चाकारापरपर्यायः कश्चन सम्बन्धः, तथा च–विशेषणविशिष्टविशेष्यनिरूपिताया विशेष्यादिगतविलक्षणनिरूपकताकाया वा प्रमावृत्तेः स्मृत्यादिजनकत्वसम्भव इति चेन्न—

तादृशवृत्तित्वमात्रस्य संशयेच्छादिसाधारण्यात् निश्चयत्वस्य च ज्ञानत्वव्याप्य(जातिरूप)स्य वृत्तावभावात्तादृशप्रमात्वेन हेतुत्वे द्रव्यं रजतमित्याकारकभ्रमादपि इच्छाद्युदयेन व्यभिचारात् , तत्र तादृशभ्रमस्य हेतुत्वान्तरकल्पने गौरवात् ( भ्रमनिष्ठप्रतिभासिकप्रमात्वसाधारणरूपेण व्यावहारिकप्रमात्वजातिनिवेशे गौरवेण स्वरूपतएव तन्निवेशात् ) चेति चेत्—

## विशिष्टस्मृतीच्छादेर्विशिष्टज्ञानाभावप्रयोज्यत्वम् ।

सत्यं तथापि विशिष्टस्मृतीच्छादौ विशिष्टज्ञानाभावस्य प्रयोजकत्वसम्भवः ।

न च सुखादौ शुक्तिरजतादौ च विशिष्टाज्ञानस्यैवाप्रसिद्धेर्नैवमिति वाच्यम्, स्वावच्छिन्नविषयताकृतत्पुरुषीयज्ञानाश्रयतानवच्छेदकत्वं स्वावच्छेदकत्वञ्चेत्युभयसम्बन्धेन विशेषणविषयताविशिष्टा या विशेष्यसंसर्गविषयता तस्यास्तत्पुरुषीयस्मृतीच्छादौ हेतुत्वसम्भवाद्विषयता च चिच्चेत्यसम्बन्ध इत्युक्तम्, तादृशाश्रयतानवच्छेदकत्वञ्च तादृशाश्रयावच्छेदकत्वसम्बन्धेन स्वात्यन्ताभावत्वं तथा च शुक्तिरूप्यविषयत्वादेतादृशसम्बन्धाप्रसिद्धावपि शुक्तित्वादिप्रतियोगिकतादृशसम्बन्धेन शुक्तिरूप्यविषयत्वाद्यभावप्रसिद्धेर्न दोषः, अज्ञानं च प्रकृतेऽसत्त्वापादकं ग्राह्यं तेन परोक्षप्रमास्थलेऽभानापादकाज्ञानसत्त्वेपि न क्षतिः एवं विशिष्टप्रत्यक्षत्वादिना यत्र हेतुत्वादिकं तत्राभानापादकाज्ञानं निवेश्य निर्वाह्यम् यत्र तु विशिष्टचाक्षुषत्वानुमितित्वादिना परेषां हेतुत्वादिकं तत्रास्माकमप्युक्तरीत्या तथैवाज्ञानाभिभावकत्वं प्रमात्वेनैव ।

## सार्वं साक्षिभास्यमित्यस्योपपादनम् ।

नन्वेवमज्ञानविषयतया सर्वं साक्षिभास्यमिति सिद्धान्तविरोधः प्रमावृत्तिं विना शुक्तित्वमिह जानामीति व्यवहारनियामकस्य साक्ष्यभिन्नचित्सम्बन्धस्यानावृतस्य शुक्तित्वादावभावाद् तदभावे च

साक्षिभास्यत्वकथनायोगादिति चेन्न—उक्तव्यवहारनियामकोक्तसम्बन्धाभावेपि शुक्तित्वमिह न जानामि इत्यज्ञानविशेषणतया शुक्तित्वावच्छिन्नविषयताकत्वस्येदम(न्त्वा)वच्छिन्नाश्रयताकत्वस्य चाज्ञानगतस्य साक्ष्यनावृतसम्बन्धवतो व्यवहारेणोक्तसिद्धान्तसङ्गतेः।

न चैवमज्ञातं घटं जानामीति व्यवहारो न स्यादिति वाच्यम्—दृष्टत्वात्सविषयकवृत्तिविशेषणतयैव विषयाणां ज्ञातत्वव्यवहाराङ्गीकारात् न हि कश्चिदनुभवति अज्ञातो घटो ज्ञात इति अत एव घटत्वेन प्रमोत्पादे घटत्वेनेमं जानामि चैत्रीयत्वादिना तु न जानामीत्यनुभवः।

अथ प्रमावृत्त्युत्तरमपीच्छादिविशेषणतया साक्षिणा भास्यमाने-शुक्तित्वादिविशिष्टेदमादौ जानामीति व्यवहारानुपपत्तिरनावृतचित्सम्बन्धस्य तत्प्रयोजकत्वात् प्रमोपरमे चावरणसम्भवादिति चेन्न-नानाज्ञानपक्षे प्रमाकाल इव इच्छाद्वेषकृतिकालेप्यज्ञानान्तरावरणानङ्गीकारात्साकारयोग्यवृत्तित्वेनैवासत्त्वापादकाज्ञानाभिभावकत्वाङ्गीकाराद्वा, अत एव स्मृतौ प्रमात्वानङ्गीकारेपि तस्या असत्वापादकाज्ञानभिभावकत्वसम्भवादयोग्यत्वेनैव संस्कारादिवारणादेकाज्ञानपक्षेपि साकारयोग्यवृत्त्यभावविशिष्टाज्ञानाभावस्यैव जानामीत्यादिव्यवहारादिनियामकत्वात्प्रमाकालस्येवेच्छादिकालस्याज्ञानसम्बन्धावच्छेदकत्वानङ्गीकाराद्वोपपत्तेः तस्माद्भावरूपाज्ञानं दुरपह्नवम्।

नन्वज्ञानस्य व्यावर्त्तकधर्मानिश्चयस्थानीयत्वेन रजतादिभेदतद्व्याप्यतदवच्छेदकधर्मावच्छिन्नविषयताकस्य तस्य रजतादिभ्रमहेतुत्वसम्भवेपि शुक्तित्वाद्यवच्छिन्नविषयताकस्य तस्य हेतुत्वं न स्या-

दुक्तव्याप्यत्वादिविशिष्टशुक्तित्वाद्यवच्छिन्नविषयताकस्यैव तस्य तत्त्वे तस्येयं शुक्तिरित्याद्याकारकतादृशव्याप्यत्वाद्यनवगाहिप्रमानभिभिभाव्यतापत्तिः—अथ तादृशव्याप्यत्वाद्यनवगाहीत्यपि शुक्तित्वावच्छेदेन रजतादिभेदप्रकारकोद्‌बुद्धसंस्कारविशिष्टोक्तप्रमया तदभिभवसम्भव इति चेन्न—तदविशिष्टाया अपि शुक्तित्वादिप्रमायास्तदभिभावकत्वस्य शुक्तित्वादिमात्रावच्छिन्नविषयताकाज्ञाने रजतादिभ्रमहेतुत्वस्य चाकरेषूक्तेः अखण्डचिदाकारचरमवृत्तेस्तथाविधाज्ञानाभिभावकत्वानुपपत्तेश्च तयोर्व्यावर्तकधर्मागोचरत्वादुक्तसंस्कारविशिष्टत्वाच्चेति चेत्—

सत्यम् व्यावर्तकधर्मानाकारकत्वेऽप्यन्वयव्यतिरेकाभ्यामुक्ताज्ञानस्य भ्रमहेतुत्वादुक्ताज्ञानप्रमयोश्चाभिभाव्याभिभावकभावाङ्गीकारात्, किञ्च शुक्तित्वाद्यवच्छिन्नविषयताकाज्ञानस्य रजतादिभ्रमहेतुत्वं शुक्तित्वादिप्रमायास्तदज्ञानाभिभावकत्वञ्चैवाकरेषूक्तं न तूक्ताज्ञानविषयतावच्छेदकशुक्तित्वादौ रजतादिभेदव्याप्यत्वाविशेषितत्वमुक्तम् ।

न वोक्तसंस्कारावैशिष्ट्यमुक्तप्रमाया उक्तमखण्डचिदाकारचरमवृत्तेरखण्डचिदाकाराज्ञानाभिभावकत्वं नानुपपन्नमविद्यादिरूसकलप्रपञ्चानात्मकं ब्रह्मेति प्रतिसन्धानरूपं तत्पदार्थशोधनजन्योद्‌बुद्धसंस्कारसहकृतत्वात् ।

नचाविद्यादिकं सद्ब्रह्मेति भ्रमे सद्ब्रह्म नाविद्यादिकमिति ज्ञानस्यैव परमतरीत्या विरोधित्वं नतूक्तसंस्कारसंस्कृतस्य शुद्धचिन्मात्रज्ञानस्येति वाच्यम्, इदं रजतमित्यादिज्ञाने शुक्तित्वाद्यवच्छेदेन

रजताद्यन्यत्वगोचरोद्बुद्धसंस्कारविशिष्टस्य इदं शुक्तिरित्यादिज्ञानस्यैव शुक्तित्वाद्यवच्छेदेन रजताद्यन्यत्वगोचरोद्बुद्धसंस्कारविशिस्य शुक्तित्वादिज्ञानसामान्यस्यापि शुक्तौ रजतमित्यादिधीविरोधित्वौचित्यात्, तन्न्यायेन प्रकृते विरोधित्वसम्भवात्।

अपि च परैरपि घटो न घट इति भ्रमे घट इत्यादिज्ञानस्यैव निर्धर्मितावच्छेदककस्य विरोधित्वमुच्यते तन्न्यायेन शुद्धचितितदन्यत्वरूपजडत्वविशिष्टाविद्यादिभ्रमं प्रति शुद्धचिन्मात्रगोचरज्ञानस्य विरोधित्वं निष्प्रत्यूहम्—

न च परमते तादृशभ्रमेच्छाविरहविशिष्टस्यैव तादृशज्ञानस्य विरोधित्वं सिद्धान्ते तूक्तज्ञानमात्रस्य विरोधित्वमिति वैषम्यमिति वाच्यम् द्वैतमात्रवीतरागपुरुष एव मोक्षहेतुतादृशज्ञानोदयेन तादृशज्ञानस्यापि द्वैतभ्रमेच्छाविरहविशिष्टत्वात्, किञ्चाहं ब्रह्मास्मीत्यादिवाक्यजन्यज्ञानस्य नाहं ब्रह्मेत्यादिभ्रमविरोधितावच्छेदकविषयताकत्वं परमतेप्यङ्गीक्रियते तथा च शुद्धचिन्मात्रे तदज्ञानाभिभवप्रयोजकविलक्षणाकारस्वीकारेणैव निर्वाहे किमिति तस्य सप्रकारकत्वे निर्बन्धः, विलक्षणाकारे च तत्त्वं पदार्थतावच्छेदकपरामर्शपूर्वकतत्त्वंपदार्थशोधनलक्षणाज्ञानादिशाब्दसामग्र्या एव नियामकत्वमित्यन्यत्।

## शुद्धचित औपनिषदत्वम्।

नन्वौपनिषदानामपि तादृशज्ञाने शुद्धचिदाकारत्वे किमिति निर्बन्ध इति चेदौपनिषदं पुरुषं पृच्छामि, नावेदविन्मनुते तं बृहन्तम्, पराञ्चि खानि व्यतृणत्स्वयम्भूस्तस्मात्पराङ् पश्यति नान्तरात्मन्, यन्मनसा न मनुते, इत्यादिश्रुतिभिः शास्त्रयोनित्वादिति न्यायात्

घटः सन्नित्यादिप्रत्यये घटाद्यवच्छिन्नचित एवेन्द्रियवेद्यत्वाङ्गीकारात्सुखादीनां साक्षिभास्यत्वेन मनसः स्वातन्त्र्येण प्रमाणत्वाकल्पनात् दृश्यते त्वग्रयया बुद्ध्येत्यादिश्रुतौ च तृतीयायाः कर्तृत्वमात्रार्थकत्वात्, अनवच्छिन्नचित उपनिषदेकगम्यत्वनिश्चयादुपनिषदां चोपक्रमादिभिः (१)शुद्धचित्येव तात्पर्यग्रहात् प्रपञ्चोपशमं शिवमद्वैतं चतुर्थं मन्यते सोऽयमात्मा स विज्ञेयः तमेव विदित्वातिमृत्युमेति नान्य इत्यादिश्रुतिषु तस्याज्ञेयत्वोक्तेः, अज्ञानकार्योपहितचितो ऽज्ञातत्वासम्भवाज्जीवेशभेदाद्यनादिपदार्थानां च संसारदशायां भासमानत्वेन तदुपहितचितोप्यज्ञातत्वासम्भवात् शुद्धचित्येवाज्ञातत्वपर्यवसानात् तस्यामेव श्रुतितात्पर्यौचित्यात्तज्ज्ञानस्यैवोक्तरीत्या विद्याभिभावकत्वसम्भवेऽधिकांशतात्पर्ये मानाभावाच्च।

ननु शुद्धचिति श्रुतेस्तात्पर्येपि श्रुतिजन्यतज्ज्ञानेऽर्थान्तरस्यापि

---

(१) उपक्रमादिभिरिति। उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्। अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये॥ इति तात्पर्यग्राहकाणि लिङ्गानि तद्यथा—

छान्दोग्ये 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इत्युपक्रमः, 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि' इत्युपसंहारः, ऐतदात्म्यम्' इति नवकृत्वोऽभ्यासः, प्रमाणान्तरानधिगतमद्वितीयब्रह्मात्मतत्त्वं प्रतिपाद्यत इत्यपूर्वता, 'आचार्यवान् पुरुषो वेद' इति 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये' इति च निरतिशयपुरुषार्थावाप्तिर्ब्रह्मज्ञानफलम्, 'अनेन जीवेनात्मनानुप्रविश्य' 'येनाश्रुतम्' इत्यादि ब्रह्मण्यर्थवादः, मृल्लोहपरशुदृष्टान्तैः स्वपिति नामनिर्वचनेन सृष्टिस्थितिसंहारैश्च ब्रह्मात्मैकत्वस्योपपत्तिरिति।

दैववशसम्पन्नशब्दसंस्कारादिसामग्रीबलाज्ज्ञाने तस्याप्यज्ञानाभिभावकत्वं भवत्विति चेद् भवत्येव, न च तमेवेत्यादिश्रुतिविरोध इति वाच्यम्, एकधैवानुद्रष्टव्यं को मोहः कः शोक एकत्वमनुपश्यत इत्यादिकेवलार्थैकपदयुक्तश्रुत्येकवाक्यतया चिदंशे संसर्गागोचरत्वमात्रस्यैवोक्तश्रुत्या बोधनात्(१), तस्याः शुद्धचिदज्ञानाभिभवप्रयोजकशुद्धचिदाकारस्य न्यायप्राप्तस्य अनुवादमात्रत्वाच्च, समूहालम्बनविधयाऽर्थान्तरग्राहिशुद्धचिदाकारज्ञानस्य मोक्षजनकत्वाव्यवच्छेदकत्वात्, अत एव 'उपमृद्नाति चेद्बुद्धिं ध्याताऽसौ न तु तत्त्ववित्। न बुद्धिं मर्दयन् दृष्टो घटतत्त्वस्य वेदिता' इत्यादिकमुक्तं अधिष्ठानतत्त्वज्ञाने स्वातन्त्र्येणेतरविषयकेप्यज्ञानाभिभावकत्वमङ्गीकृत्य ध्यानदीपिकायां विद्यारण्यश्रीचरणैः, अन्यतिरिक्तैकरसप्रातिपदिकार्थमात्रान्वय इति पञ्चपादिकाद्युक्तिः, संसर्गासङ्गिसम्यग्धीहेतुतेतितत्त्वप्रदीपिकाद्युक्ति, श्चोक्तरीत्या नेया।

यदि तु मोक्षहेतुज्ञाने तत्त्वातिरिक्तं न भासते इति नियमः 'द्वैताद्वैतबुद्ध्योर्न यौगपद्यमिति' विवरणात् 'संन्तमसबहलालोकयोरिव त्वनयोर्विरोध' इति तत्त्वदीपनाच्च तदा रागान्धस्य कामिन्यादिजिज्ञासाया इतरभानप्रतिबन्धकत्ववत् वीतरागस्य तत्त्वजिज्ञासायास्तत्त्वेतरभाने प्रतिबन्धकत्वस्य सम्भवान्नानुपपत्तिरिति ध्येयम्।

---

(१) बोधनादिति। तथा च तमेव विदित्वेति श्रुत्या एवकारेण चिदंशेसंसर्गगोचरज्ञानस्यैव व्यावृत्तिः क्रियते नतु वस्त्वन्तरविषयकज्ञानस्यापीत्यर्थः।

## तत्त्वज्ञानार्थं प्रवृत्त्यनुपपत्तिशङ्का—

ननूक्तज्ञानमुद्दिश्यविषयभोगमात्रतिरस्कारेण प्रवृत्त्यनुपपत्तिः तस्य भोगमात्रापेक्षयोत्कर्षाभावात् , सुखदुःखाभावतत्साधनान्यत्वेनोद्देश्यत्वासम्भवाच्च—न च मोक्षरूपनिरतिशयनित्यसुखसाधनत्वेन तादृशज्ञानस्य सातिशयविनाशिभोगमात्रतिरस्कारेणोद्देश्यतेति वाच्यम् , मोक्षस्य चिन्मात्रत्वे साध्यत्वानुपपत्तेः, चिदन्यत्वे अतोन्यदार्त्तमित्यादिश्रुत्या मिथ्यात्वादिहेतुकानुमित्यादिना च विनाशित्वात् , नचाविद्याध्वंसोपहित आत्मैव मोक्षो अविद्याध्वंसश्च सदसत्सदसदनिर्वाच्येभ्यो भिन्नो अविद्यानुपादानककार्यत्वादविद्याविशिष्टं प्रत्येवाविद्याया उपादानत्वात् तद्ध्वंसस्य च तत्कालीनत्वरूपतद्वैशिष्ट्याभावात् , तथा चाविद्याध्वंसोपहितचित एवानवच्छिन्नानन्दभानरूपत्वेन(अविद्याध्वंसस्य)अवच्छिन्नसकलानन्दतिरस्कारेण काम्यत्वसंभवात्तत्साधनज्ञानस्यापि तथैव काम्यतेति वाच्यम् , उक्तध्वंसस्याविद्यानुपादानत्वेपि दृश्यत्वादेव मिथ्यात्वसंभवात् दृग्दृश्ययोः संबन्धानुपपत्तिरूपानुकूलतर्केण व्याप्तिनिश्चयादिति चेत्—

## तत्त्वज्ञानार्थं प्रवृत्त्यनुपपत्तिवारणम्

सत्यं, मिथ्यात्वेपि तादृशध्वंसस्याविद्यानुपादानकत्वादेव ज्ञानानिर्वर्त्यत्वेनाविनाशित्वसंभवात् , अविद्याध्वंसस्य ध्वंसेऽविद्योन्मज्जनप्रसङ्गात् तदुपहितात्मरूपस्य मोक्षस्य नित्यत्वेनानित्यसकलपुरुषार्थापेक्षयोत्कर्षात् ।

न च विषयसुखस्येवानवच्छिन्नसुखस्यैवान्येच्छानधीनेच्छाविषय-

त्वं न तु तद्भानस्य तथा च तद्भानस्य सुखं दुःखाभावं वा प्रति साधनत्वेनैव कम्यता वाच्या तच्च तस्य न संभवति इति काम्यत्वासंभव इति वाच्यम् , चिद्रूपस्य सुखस्यावृतस्याकाम्यत्वेन सुखभानस्यैव सर्वत्र काम्यत्वात् , विषयसुखस्थलेपि चन्दनादिसंयोगजन्यमनोवृत्तिविशैषैरनानंदापादकावरणनाशाङ्गीकारेण तद्विशिष्टचित एवात्मसुखभानरूपायाः काम्यत्वात् यावगतिरन्येच्छां विनैव काम्यते सा पुरुषार्थ इत्यभ्युपगमात् , अत एव सुखं ते भविष्यति मह्त् परं तु तव न भास्यतीति प्रतारितस्तत्सुखं न कोपि कामयते ।

न चावरणं नाशं कल्पयित्वा तद्विशिष्टचितः सुखभानत्वकल्पनादचिद्रूपमनोवृत्तिविशेष एव सुखमिति वरं कल्प्यतामिति वाच्यम् , मनोवृत्तिं विनापि सुषुप्तौ चिद्रूपसुखस्य भातस्य सुखमहमस्वाप्समिति जाग्रति स्मृत्युदयात् ।

न चाविद्यावृत्तिरेव सुखं संभवतीति वाच्यम् सुषुप्तौ चित्सुखेनैव निर्वाहे (तदा)दितरकल्पने गौरवात् रजोगुणोद्रेकस्यावरणस्याभावादेव तदानीं तद्भानसंभवात् ,अत एव विषयसंयोगेन वासनाक्षयेण वा रजसः क्षयतारतम्येन सुखभानतारतम्यम्। किञ्च मा न भूवं सदा भूयास (१) मित्यन्येच्छानधीनेच्छायाश्चिदात्मनि दर्शनात्सुखमेव सः।

---

(१) मा न भूवमिति । इयमात्मा परानन्दः परप्रेमास्मदं यतः । मा न भूवं न भूयासमिति प्रेमात्मनीक्ष्यते ॥ तत्प्रेमात्मार्थमन्यत्र नैवमन्यार्थमात्मनि । अतस्तत्परमं तेन परमानन्दतात्मनः ॥ इति पञ्चदश्युक्ततर्केणात्मनः परमानन्दरूपतालाभ इति भाव, ।

न च बलवद्व्याधिपीडायां मा भूवमिति द्वेषस्याप्यन्यद्वेषानधीनस्य कदाचिद्दर्शनात् दुःखमपि स स्यादिति वाच्यम्, तादृशद्वेषस्य दुःखद्वेषेणैवोदयात् व्याध्युपगमे मा न भूवमिति इच्छाया एवोदयात् आनन्दरूपममृतं यद्विभाति एषोऽस्य परमानन्दः भूमैव सुखं नाल्पे सुखमस्ति विज्ञानमानन्दं ब्रह्म आनन्दो ब्रह्मेत्यादिश्रुत्या आत्मन आनन्दत्वोक्तेः ।

न च नाल्पे सुखमिति स्वारस्येन भूम्नि सुखमित्यर्थ इति वाच्यम् भूमा त्वेव विजिज्ञासितव्य इत्यस्य भूमैव सुखमित्यस्य च सावधारणस्यानुसारात् अल्प इत्यस्यैव अल्पमित्यर्थकत्वात्परमप्रयोजनत्वेन भूम्न एव प्रकरणप्रतिपाद्यत्वात् 'भूमा संप्रसादादध्युपदेशादिति' न्यायात् । (१)प्रेयोऽन्यस्मात्सर्वस्मादन्तरं यदयमात्मेत्यादि-

---

( १ ) न्यायादिति । भूमा संप्रसादादध्युपदेशात् ( ब्र० अ० १ पा०३ सू०८ ) इत्यधिकरणे 'भूमा त्वेव विजिज्ञासितव्य' इति श्रुतिः । तत्र संशयः किं प्राणो भूमा स्यादाहोस्वित्परमात्मा, तत्र 'प्राणो वा आशाया भूयान्' इति संनिधानात्प्राणो भूमेति प्राप्ते परमात्मैव भूमा भवितुमर्हति न प्राणः कस्मात् संप्रसादादध्युपदेशात् संप्रसाद इति सुषुप्तं स्थानमुच्यते सम्यक् प्रसीदत्यस्मिन्निति निर्वचनात् तस्यां च संप्रसादावस्थायां प्राणो जागर्तीति प्राणोऽत्र संप्रसादोऽभिप्रेयते प्राणादूर्ध्वं भूम्न उपदिश्यमानत्वादित्यर्थः प्राण एव चेद् भूमा स्यात्स एव तस्मादूर्ध्वं कथमुपदिश्येत इति प्रतिपादितम् । ततश्च भूमैव प्रकरणप्रतिपाद्य इति सिद्धम् ।

श्रुतिभिः स्वान्यसर्वापेक्षया आत्मनः प्रियत्वोक्तेः । अत एव दुःखाभावस्य पुरुषार्थतावादोऽप्यपास्तः । सुखव्यञ्जकत्वेनैव तस्य काम्यत्वाच्च, दुःखाभावापेक्षया सुखस्य लघुत्वात् । तस्माच्चिदेव सुखमिति तस्या एवावरणविशेषध्वंसोपहिताया मोक्षत्वमव्याहतम् ।

## अविद्याध्वंसस्यात्मरूपकत्वकथनम् ।

वस्तुतस्तु चिदन्यस्याविनाशिनोऽविद्याध्वंसस्यानङ्गीकारेपि न क्षतिः, चित एव तत्त्वज्ञानतत्संस्काराद्युपहिताया तद्व्यवहारनियामकत्वसम्भवात् 'निवृत्तिरात्मा मोहस्य ज्ञातत्वेनोपलक्षित' इतिवार्तिकाद्युक्तेः तत्त्वज्ञानाधीनाग्रिमसमयसम्बन्धवत्त्वस्यातत्त्वज्ञानाभावप्रयोज्याविद्यात्मकाभावप्रतियोगित्वस्य वा तत्त्वज्ञानसाध्यत्वस्यानवच्छिन्नसुखरूपमोक्षरूपात्मनि सम्भवात् , दण्डात् घटस्याग्रिमक्षणसम्बन्धो दण्डाभावात् घटाभाव इतिवत् तत्त्वज्ञानादिदानोमनवच्छिन्नसुखं प्राप्तः तत्त्वज्ञानाभावादज्ञोहमिति प्रतीतेः वस्तुगत्या तत्सुखस्यासाध्यत्वेपि साध्यत्वभ्रमेणापि प्रवृत्तिसम्भवाच्च, तादृशभ्रमस्य चापरोक्षतत्त्वज्ञानैकनिवर्त्यत्वात् , वैषयिकसुखस्यापि नित्यचिद्रूपत्वेन तदर्थमपि साध्यत्वभ्रमेणैव सर्वत्र प्रवृत्तिस्वीकारात् , आवरणाभिभावकवृत्त्युपहितरूपेणात्मनः उत्पाद्यत्वरूपसाध्यताया अपि सम्भवाच्च, तादृशसाध्यत्वस्यैव लोकसिद्धस्य श्रुत्यादिभिरनुवादात् , एवञ्च वृत्तिप्रमाया एव अज्ञानध्वंसत्वाङ्गीकारपक्षेपि न क्षतिः ।

अथ वृत्तिप्रमाया अविद्याध्वंसत्वे तन्नाशकाले कथमविद्यानाशव्यवहारः यदि चोत्तरोत्तरमनःपरिणामानामेव पूर्वपूर्वमनःपरिणामध्वंसत्वात् घटनाशस्य घटप्रागभावनाशत्ववत् प्रमानाशादिरेवाविद्याध्वंस इत्युच्यते, तथापि विदेहकैवल्यभाक्तनचरममनःपरिणामध्वंसः क इति पर्यनुयोगावश्यकत्वम् ।

यदि च तद्ध्वंसो नाभ्युपेयते तद्व्यवहाराभावादित्युच्यते तदापि तादृशपरिणामः क गत इति पर्यनुयोगानुद्धार इति चेत्तर्हि यत्र ध्वंसोऽङ्गीकृतस्तत्रापि प्रतियोगी क गत इति पर्यनुयोगात्कथं निस्तारः

अथ तत्र प्रतियोगी घटादिर्ध्वस्त इति चेत्सत्यमुक्तम् , किन्तु ध्वंसः प्रतियोग्यवस्थाविशेषो वा प्रतियोगिनोऽत्यन्तभिन्नो वा, आद्ये प्रतियोगिनः पूर्वावस्था क गतेति पर्यनुयोगः, अन्त्ये ध्वंसस्य जातत्वेपि प्रतियोगी क गत इति पर्यनुयोगः सुतरां दुरुद्धरः ।

अथध्वंसकालात्पूर्वं प्रतियोगी प्रमाणगोचरो न ध्वंसकाले न तु कचिद्गतो ध्वस्तताव्यवहारार्थन्तुध्वंसोऽङ्गीक्रियत इत्युत्तरं तर्हि प्रकृतेपि विदेहकैवल्यपर्यन्तं व्यवहारस्योक्तरीत्या सम्भवात् तदुत्तरं चरमपरिणामस्य प्रमाणागोचरत्वात् व्यवहारस्यैवाभावेन ध्वंसानंगीकारेपि क्षत्यभावात् न काप्यनुपपत्तिरिति सुचिरं विभावनीयम् ।

अथ ध्वंसकाले प्रतियोग्यसत्तायां ध्वंससामग्र्येव नियामिका तद्देशावच्छेदेन ध्वंससामग्रीमत्क्षणत्वस्य तद्देशावच्छेदेन प्रतियोगिमान्यः कालस्तत्पूर्वत्वानधिकरणत्वव्याप्यत्वात् , तत्प्रतियोगिकध्वंसस्य त-

त्सहानवस्थाननियतत्वाच्च तदुक्तचरमपरिणामस्य तु पश्चादसत्तायां नियामकाभाव इति चेन्न—प्रारब्धभोगकर्मणो(१) देहादिनिवृत्तौ प्रतिबन्धकत्वेन विदेहकैवल्यपर्यन्तं मनोवृत्त्यादिरूपस्य प्रारब्धभोगोपयुक्तप्रपञ्चस्य सत्त्वेप्यग्रे तदसत्तायां तत्त्वप्रमाया एव नियामकत्वात् तत्त्वप्रमायास्तत्त्वाज्ञानतत्प्रयुक्तपूर्वानवस्थाननियतत्वादिति दिक् ॥

इत्यद्वैतसिद्धान्तविद्योतने परमहंसपरिव्राजकश्रीब्रह्मानन्दसरस्वतीविरचिते प्रथमः परिच्छेदः ॥

॥ शुभमस्तु ॥

---

(१) प्रारब्धभोगकर्मण इति । 'क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे' इति श्रुत्या 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन' इति स्मृत्या च कर्मणां ज्ञाननाश्यत्वावगमेऽपि 'नाभुक्तं क्षीयते कर्मे'ति स्मृत्या 'भोगेन त्वितरे क्षपयित्वा ततः संपद्यत' इति न्यायेन च प्रारब्धेतरकर्मणामेव ज्ञाननाश्यत्वमिति प्रारब्धकर्माणि देहनिवृत्तिप्रतिबन्धकानीति भावः ।

रामेश्वरतनूजन्मा सूर्यनारायणः सुधीः ।
काश्यामद्वैतविद्योतटिप्पणीमकरोन्मुदा ॥

इति न्यायव्याकरणाचार्य सूर्यनारायण विरचित—अद्वैतसिद्धान्तविद्योतटिप्पणं समाप्तम् ।

# अद्वैतसिद्धान्तविद्योतनस्य शुद्धिपत्रम्

| अशुद्धम् | शुद्धम् | पृ० | पं० |
|---|---|---|---|
| भ्रमस्थले | भ्रमस्थलेऽपि | २ | ११ |
| ऽहङ्कारप्रत्य | ऽहमाकारप्रत्यय | ५ | १० |
| अहमिवास्मिहै | अहमिहैवास्मि | ५ | १२ |
| तत्र विषयानिवेशात्कथं | कथं | ५ | १७ |
| वाद्यादिसंयोगा | वाय्वादिसंयोगा | ७ | ७ |
| स्वप्नादिभ्रमे | स्वाप्नादिभ्रमे | ७ | १२ |
| हेतुतास्थले | हेतुतास्थले तु | ८ | ४ |
| प्रकारतात्वनिरूपितत्व | प्रकारतानिरूपितत्व | ९ | ७ |
| विशेषतात्वयो | विशेष्यतात्वयो | ६ | ८ |
| संबन्धावच्छेदकतया | संबन्धतावच्छेदकतया | ९ | ११ |
| हेतुत्वं वाच्यं | हेतुत्वे वाच्ये | १२ | ११ |
| तत्तत्कारणता | तत्तत्कार्यकारणता | १२ | १४ |
| पुरुषाय | पुरुषीय | १४ | ४ |
| स्वोपक्षाबुद्धि | स्वापेक्षाबुद्धि | १४ | ५ |
| तत्पुरुषाणां | तत्तत्पुरुषाणां | १४ | ६ |
| धीस्थलेषु | धीस्थले तु | १४ | ८ |
| विशेषणविशिष्ट | विशेषणविशिष्टं | १४ | १५ |
| प्रवृत्त्युपपत्तेः | प्रवृत्त्यनुपपत्तेः | १४ | १६ |
| मवच्छेदकभावे | मवच्छेद्यावच्छेदकभावे | १५ | ४ |
| तस्य संबन्धतया | तस्य तत्संबन्धतया | १५ | १४ |
| संभवातद्विषय | संभवाद्विषय | १६ | २ |
| देहावच्छिन्ने माना | देहावच्छिन्नत्वे माना | १६ | ५ |

| अशुद्धम् | शुद्धम् | पृ० | पं० |
|---|---|---|---|
| चाक्षुषप्रत्यक्षे | वा प्रत्यक्षे ( पा० ) | १६ | ७ |
| तत्तत्पुरुषसमवेतमानसे | तत्तत्पुरुषसमवेतविषयमानसे | १६ | ९ |
| धर्मादिविषयक | धर्म्यादिविषयक | १६ | १५ |
| चाक्षुषाद्युत्पत्तिक्षणे | चाक्षुषाद्यन्त्यक्षणे | १६ | २१ |
| ननु तत्र | तत्र | १६ | १५ |
| संसर्गतनिरूपित | संसर्गतानिरूपित | २२ | ४ |
| बाधबुद्ध्यावतार | बाधबुद्ध्यवतार | २४ | २ |
| सत्त्वाभवदि | सत्त्व त्यत्त्वाभवदि | २६ | ४ |
| सर्वान्तरः स आत्मा | सर्वान्तरः कतरः स आत्मा | ३२ | २ |
| गन्धान् जिघ्रति | गन्धानाजिघ्रति | ३२ | २ |
| नुभवादि | नुमानादि | ३२ | १५ |
| तत्तद्विषयत्वेन | तत्तद्विषयकत्वेन( पा० ) | ३२ | १५ |
| ब्रह्मचैतन्येऽपि | ब्रह्मचैतन्ये | ३५ | १६ |
| रूपावारण | रूपा त्ररण | ३७ | ७ |
| भावाभावविलक्षणचैतन्य | भावाभावविलक्षणस्व-चैतन्य | ३९ | ६ |
| तत्र प्रागभावत्वस्य | तत्र प्रमाप्रागभावत्वस्य | ३९ | १० |
| विषयतावच्छेदकत्वात् | विषयतानवच्छेदकत्वात् | ४० | ४ |
| सामान्यस्यास्तितात्वेऽपि | सत्तासामान्यस्यास्तितात्वेऽपि | ४५ | १० |
| वृत्तिरिव | वृत्तिरिवा | ४८ | ११ |
| विशेष्यतावच्छिन्ने | विशेष्यतानिरूपिते | ६८ | ११ |
| संसर्गतावच्छिन्नत्वं | संसर्गतानिरूपकत्वं | ६८ | ११ |
| ज्ञानाज्ञानयोः स्वविषये | ज्ञानाज्ञानयोरेव विषये | ८० | १५ |
| पर्सचार | पचार | ८१ | १ |

| अशुद्धम् | शुद्धम् | पृ० | पं० |
| --- | --- | --- | --- |
| निर्वर्त्याज्ञान | निवर्त्याज्ञान | ८१ | ६ |
| निर्वर्त्याज्ञान | निवर्त्याज्ञान | ८१ | ९ |
| रिद्माद्यवगाहित्वात् | रिद्माद्यनवगाहित्वात् | ८२ | २ |
| प्रमास्थले | भ्रमस्थले ( ख. पु. पा. ) | ८२ | ३ |
| निरूपकत्वा | निरूपकत्व | ८२ | १४ |
| तादृशाश्रयावच्छेदकत्व | तादृशाश्रयतावच्छेदकत्व | ८३ | ९ |
| स्वात्यन्ताभावत्वं | स्वात्यन्ताभाववत्त्वं | ८३ | ९ |
| विषयत्वादेतादृश | विषयत्वादेस्तादृश | ८३ | १० |
| शुक्तित्वादिप्रतियागिक | शुक्तित्वाश्रयतादिप्रति-योगिक (ख० पु० पा०) | ८३ | १० |
| भिभावकत्वं प्रमात्वेनव | भिभावकत्वंतु प्रमात्वेनैव | ८३ | १६ |
| प्रवृत्युत्तरमपि | प्रवृत्युपरमेऽपि | ८४ | १० |
| व्यावर्तकधर्मानिश्चय | व्यावर्तकधर्मनिश्चय (पा०) | ८४ | २० |
| तस्य हेतुत्वं | तस्य तद्धेतुत्वं | ८४ | २२ |
| संस्कारविशिष्ट | संस्काराविशिष्ट | ८५ | ८ |
| मविद्यादिरूपसकल | मविद्यादिरूपसकल | ८५ | १७ |
| ऽतिसन्धानरूपं तत्पदार्थ | प्रतिसन्धानरूपतत्पदार्थ | ८५ | १८ |
| विशिस्य | विशिष्टस्य | ८६ | २ |
| मन्यते | मन्यन्ते | ८७ | ६ |
| विद्यारण्यै श्रीचरणैः | विद्यारण्यश्रीचरणैः | ८८ | ११ |
| नुपादानत्वेऽपि | नुपादानकत्वेऽपि | ८९ | १४ |
| प्रवृत्तया | प्रवृत्त्य | ८९ | १६ |
| तादृशध्वंस | दृश्यध्वंस ( ख० पु० पा० | ८९ | १७ |
| म्मज्ञन | म्मज्ञन | ८९ | १८ |
| कस्यता | काम्यता | ९० | २ |

| अशुद्धम् | शुद्धम् | पृ० | पं० |
|---|---|---|---|
| नचावरणं नाशं | नचावरणनाशं | ९० | ९ |
| सुखं संभवतो | सुषुप्तौ सुखं संभवतो | ९० | १३ |
| ( तदा ) द्वितरकल्पने | तत्कल्पने | ९० | १४ |
| व्याप्युपगमे | व्याप्यपगमे | ९१ | ३ |
| स्याविनाशिनोऽ | स्त्वविनाशिनोऽतत्त्व ज्ञानाधीना(ख०पु०पा०) | ९२ | ७ |
| स्यातत्त्वज्ञानाभाव | स्य तत्त्वज्ञानाभाव | ९२ | १२ |
| क्षगत | क्ष गत | ९३ | ७ |
| प्रारब्धभोगकर्मणो | प्ररब्धभोगककर्मणो | ९४ | ३ |